

॥[illegible]स्तुवीमहि महामोहत्केशांतकभिषग्वरं॥त्रैधातुकनिदानज्ञंस
र्वज्ञंदुःखहानये॥१॥कलाविलासान्मकरंदबिंदुमुद्राविनिद्रेहरयारविंदैर्याकल्पयं
तीरमतेकवीनांदेवीनमस्याभिसरस्वतीनां॥२॥कवींद्रकुमुदानंदकंदोकमंसुधाकरं
वाचस्पर्द्धिशेमुषीचंद्रिकोद्भवं॥३॥क्षुभ्यद्दुग्धाब्धिकल्लोलमालोल्लासियशःश्रियं
गुरुंवंदेजगद्वंद्यगुणरत्नैकरोहणं॥४॥श्रीसाहसांकनृपतेरनवद्यविद्यवेद्योतरंग
पदमव्ययमेवबिभ्रत्॥यश्चंद्रचारुचरितोहरिचंद्रनामास्वाख्ययाचरकतंत्रमलं
चकार॥५॥आसीदसीमवसुधाधिपवंदनीयेतस्यान्वयेसकलवैद्यकुलावतंसः॥६
कस्यदस्त्रइवगाधिपुराधिपस्यश्रीकल्हइत्यमलकीर्तिलताविताननः॥६॥संकल्पसं
भिलदनल्पविकल्पजल्पकल्पानलाकुलितवादिसहस्रसिंधुः॥तर्कत्रयत्रिनयनस्त
नयोयदियोदामोदरःसमभवद्भिषजांवरेण्यः॥७॥तस्याभवत्सूनुरुदारवाचोवा
चस्पतिश्रीललनाविलासी॥सद्वैद्यविद्यानलिनीदिनेशःश्रीमल्लक्ष्मणःसत्कुलराक
रेंदुः॥८॥यद्भ्रातृजःसकलवैद्यकतत्त्वरत्नरत्नाकरश्रियमवाप्यचकेशवोऽभूत॥

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

कीर्तेर्निकेतनमनिंद्यपदप्रमाणवाक्यप्रपंचरचनाचतुराननश्रीः॥९॥कृत्स्नस्यतस्य
चसुतःस्मितपुंडरीकखंडायतपत्रपरभागयशःपताकः॥श्रीब्रह्मइत्यविकलात्मसुखावि
र्दसोल्लासलासितरसार्द्रसरस्वतीकः॥१०॥तस्यात्मजंसरसकैरवकोतकीर्तिःश्रीमा
न्महेश्वरइतिप्रथितःकवींद्रः॥निःशेषवाङ्मयमहार्णवपारदृश्वाशङ्खागमांबुरुहषंडर
विर्बभूव॥११॥श्रीसाहसांकचरितादिमहाप्रबंधनिर्वाणनैपुण्यगुणागतगौरवःश्रीः
योवैद्यकप्रियसरोजसरोजबंधुःसत्यंचकारकविकैरवकाननेंदुः॥१२॥इत्यक्षतिस्त
स्यमहेश्वरस्यवैदग्ध्यसिंधोःपुरुषोत्तमानोर्हृदीप्यनंहृत्कमलेषुनित्यमाकल्पमाक
ल्पितकौस्तुभश्रीः॥१३॥लब्धैःकथंचिदभिजातसुवर्णकारलीलेनकोशशतरत्नधि
शङ्करत्नैः॥विश्वप्रकाशइतिकोचनबंधशोभांबिभ्रन्मयात्रघटितोसुखखंडएषः॥१
फणीश्वरोद्धारितशङ्खकोशरत्नाकरालोउनलालितानां॥सेयंकथंनेषसुवर्णशैलो
विश्वप्रकाशोविबुधाधिपानां॥१५॥भोगींद्रकात्यायनसाहसांकवाचस्पतिव्याडिपु १
रःसराणां॥सविश्वरूपापरमंगलानांशुभांगवोपालितभागुरीणां॥१६॥ ॥युग्मं॥

कोशावकाशात्प्रकटप्रभावसंभावितानर्घ्यगुणःसएषः॥संपादयन्नेष्यतिवांछितार्थान्कथंनचिंतामणितोकवीनां॥१७॥भामित्रशैलश्चरमाचलमेकलाद्रिकैलासभू
मिवलयेयदिहास्तिकिंचित्॥एकत्रसंभृतमगोचरराङ्करत्नमालोक्यतांतदखिलंसुधियः
कवींद्राः॥१८॥यद्यस्तिवाङ्मयमहार्णवमंथनेलाभात्परंफणिपतेर्यदिकौतुकंवः॥वि
श्वप्रकाशमनिशंतदिमंविलोक्यंसंभाव्यतांपरमशाङ्किकशेखरःश्रीः॥१९॥सतांपुस्त
कसंभारमोक्षहेतोमया॥नामाऽनुशासनमिदंसंपूर्णतन्यतांकृतं॥२०॥एकद्वित्रिचतुः
पंचषड्वर्णोऽनुक्रमोज्वलैः॥कांताद्विवर्गैर्नानार्थसंग्रहोयंवितन्यते॥२१॥नानार्थैः प्रथमो
तोऽत्रसर्वत्रादोप्रदर्शितः॥सप्तम्यंतेषुशब्देषुवर्तमानेषुनिश्चितः॥२२॥दृष्टांतेनसहका
पिसप्तम्याधारएवच॥स्वस्यायलिंगभेदायकाप्यत्रपुनरुक्तता॥२३॥ ॥कएकः॥ ॥
कोब्रह्मात्मानिलार्केषुशमनेसर्वनाम्निच॥पावकेचमयूरेचसुखेशीर्षजलेषुकः॥२४
कोद्वितीयः॥ ॥अर्कपापेचदुःखेचशुक्लेराजन्यदेशयोः॥अर्कस्तुवकपुष्पेस्यात्कं
केशीद्वेचरक्षसि॥२५॥शुकोव्याससुतेकीरेतथारावणमंत्रिणि॥ग्रंथिपर्णेशरीरेचशु

कंचशोणकेकचित्॥२६॥द्विकःकाकेचकोकेचश्लोकोबाणनिलासले॥अर्कोऽर्कप
र्णस्फटिकेरवौताम्रेदिस्पैवेतौ॥२७॥कर्कःकर्कतनेचक्लीश्वेतदर्पणेघटे॥तर्कःको
क्षाविनकौहकमभेदेधुकीर्त्यते॥२८॥श्लोकोयशसिपद्येचलोकस्तुभुवनेजने॥स्तोकोऽ
ल्पेचातकेतोकमपत्यपुत्रयोरपि॥२९॥कोकश्चक्रेकृकेज्येष्ठरवर्जूरीद्रुमभेदयोः॥रोको
हीलोविलेरोकंनोकाक्रयणभेदयोः॥३०॥लोकोविदग्धेलोकस्तुविश्वस्तमृगपक्षिणोः॥
रेकोविरेकेशंकायांरेकःस्यादधमेपिच॥३१॥काकःस्याद्वायसेवृक्षप्रभेदेपीटसर्पि
णि॥शिरोऽवक्षालनेमानविशेषेपूपभेदयोः॥३२॥काकास्यात्काकनासायांकाकोलो
काकजघयोः॥रक्तिकायांमलघ्नेचकाकमाच्यांचकीर्तिता॥३३॥काकंस्त्रीरत्नबंधेस्या
त्काकानामपिहेसंतो॥पाकःशिशोर्जरानिष्पत्तनक्लेदनेषुच॥३४॥शाकोद्वीपांतरेरा
क्षोवृक्षद्रुमविशेषयोः॥शाकंहरितकेचापिनाकःस्वर्गांतरिक्षयोः॥३५॥मूकोप्यबा
ह्यतोद्दीनेशुकोनुकोशशुद्धयोः॥मृकश्चिद्रेचकालेचभेकोमंडूकमेघयोः॥३६॥एकं २
नुकेबलेश्रेष्ठतरस्त्रिंश्चवाच्यवत्॥शोकंशुकसमूहेचस्त्रीणांचकरणांतरे॥३७॥अं

कःस्यानेत्रिकमंतोरूपकोसंगलक्ष्मसु॥नाटकादिपरिछेदेचित्रयुद्धेचभूषणे॥३८॥
कंकश्छद्मद्विजेख्यातोलोहपृष्ठकृतांतयोः॥बंकःपर्याणभागेस्याद्भरीपात्रेचभंगुरे॥
३९॥टंकःकपित्थभेदेस्यान्मानांतरखनित्रयोः॥कोपेसिकोशजंघायांटंकणेक्षारहा
रणे॥४०॥ढंकस्तुरुपणेमहेढंकःकर्मपापयोः॥ढुंढुर्मेरुरधोनाकुनामसूरेगिरौमु
नौ॥४१॥शंकुःकिलेशिवेऽस्त्रेचसंख्यायाःप्रभेदयोः॥कल्कःपापाशयेपापेदंभेविद्
विषेदयोरपि॥४२॥वल्कोतुवल्कलेरवंडेशल्कंशकलवल्कयोः॥शुल्कंघट्टादिदेयेस्याज्ञा
मातुर्वधकेऽपिच॥४३॥निष्कमक्षादिकेस्वर्णशतेहीनारकर्षयोः॥वक्षोऽलंकरणेह
ममात्रेहेमपलेपिच॥४४॥सुकोऽऽकोशेसंघातेसुकोमोक्षकपारदे॥किंकुर्हस्तविन
स्तोचप्रकोष्ठेविस्तृतेपिच॥४५॥त्रिकाकूपस्यनेमोस्यात्त्रिकंपृष्ठाधरत्रये॥लंकारक्षः
पुरीशास्वाशाकिनीकुलसत्रच॥४६॥शंकोत्रासेवितर्केचसाकाकुसरिदंतरे॥कपूर्नवर
जःकन्यापूर्णेदुपूर्णिमासुच॥४७॥ ॥कस्तृतीयः॥ ॥कनकंचंपकेस्वर्णेकिंशुकेनाग
केसरे॥धतूरेकांचनारेचकालीयेपिकचिन्मते॥४८॥कष्कस्तुकरंकस्याद्वादिमेचकमं

उलो॥पक्षिभेदेकरेचापिकरकःस्याद्दनोपले॥४९॥नरकोपिरयेदैत्येसरकःसीधुभाजने॥
अच्छिभाऽध्वगपक्षोचसीधुपानेचसीधुनि॥५०॥स्वनकश्चित्ततत्वज्ञेसंधिचौरेचमूषके॥ज
नकःपितृराजर्ष्योर्युतकंसंशयेयुगे॥५१॥योनीकंचलमांसेचस्त्रीवस्त्रांचलयुग्मयोः॥क
र्कितःकर्षुकेफालेरजकोधावकेशुके॥५२॥मधुकोवंदिभेदेस्यात्पुष्पाख्यविहगांतरे॥
मधुकोमधुपर्ण्यांस्यात्अणुकोनिपुणात्मयोः॥५३॥वसुकःशिवमल्लोस्यादर्कपर्णेचरोम
कं॥शिशुकःशिशुमारेस्याद्बालकोलूशिनोरपि॥५४॥कमुकःपट्टिकालोध्रेभद्रमुस्तक
मूलयोः॥फलेकर्पासिकायाश्चकमुकोब्रह्मराक्षसि॥५५॥बकुलःकर्कटेकेचवात्मूहेजल
खारके॥धनिकःसाधुधान्यकधनेषुधनिकास्त्रियां॥५६॥शिखकःपीतसालेस्यान्नीलेचि
त्रमृगेऽलिनि॥कुंकुमेचप्रियंगौचपृश्नुकश्चिपिटेशिशौ॥५७॥यमकंयमकेशाष्टालंकारेस
मेपिच॥मशकःकथ्यतेक्षुद्रजंतुरोगविशेषयोः॥५८॥कुलकंचपटोलेस्यात्श्लोकसंघ
धनुछयोः॥कुलकुश्चकुलश्चेवस्त्रीकेकाकतिंदुके॥५९॥तिलकंचित्रकेप्राहुर्ललामेति २
लकालके॥रोगाऽश्वदुमभेदेषुक्लोम्निसोवर्चलेपिच॥६०॥कुलिकोनागभेदेस्यात्कुभेदेकु

लसमने॥कुशाकःस्यान्मुनौकालेशेषसर्क्षेक्षयोः॥६१॥चषकंतुसुरापात्रेमंथमद्य
प्रभेदयोः॥चटकःकलविंकेपिचटकास्त्रीरूपवत्यपि॥६२॥कटंकवलयेसानौराजधा
नीनितंबयोः॥समुद्रलवणेऽंतर्मंडलेरंतिनामपि॥६३॥कटुकंकटुरोहिण्यांद्व्योषेपिकटु
कंस्मृतं॥चुलकःप्रस्तरीभांडभेदेचुलवन्मतः॥६४॥पुलकश्छत्रिभेदेस्याद्रत्नकर्मणि
दोषयोः॥गजांत्रपिंडेरोमांचेहरितालेशिलांतरे॥६५॥रूचकंमंगलद्रव्येग्रीवाभरण
दंतयोः॥ईडकेबीजपूरेचसौवर्चलविडंगयोः॥६६॥रोचनायांचरूचकमस्याभरणमा
लयोः॥क्षुरकःकोकिलाक्षेस्याद्गोक्षुरेतिलकद्रुमे॥६७॥कासुकःकामनेशोकेपादपे
चातिमुक्तके॥पालुकःपतयालौस्यात्पानजलहस्तिनोः॥६८॥आनकःपटहेभेर्यांमृ
दंगध्वनरंबुदे॥आढकेमानभेदेस्यात्तुवर्यामारुकोमता॥६९॥कारकःकत्तरिप्रोक्तःक
र्मादावपिकारकः॥चारकःपालकेऽश्वादेःस्यात्संचारकबंधयोः॥७०॥तारकःकर्णधारे
चदेत्येचदृशितारकं॥कनीनिकायांनक्षत्रेतारकंतारकापिच॥७१॥वारकोऽश्वगता
वश्वविशेषेचनिषेधके॥जाहकोयोघमाऊरपट्टिकाकुंडिकासुच॥७२॥पावकोऽग्नौ

सदाचारेवह्निमंथेचचित्रके॥मल्लातकेविडंगेचसाधकः शरवह्नयोः॥७३॥नाय
कोनेत्रिश्रवेहारमध्यमणावपि॥प्राणकःसत्वजातीयेजीवकद्रुमवेल्लयोः॥७४॥जा
लकंकारकेप्रोक्तंकलायेजालिनीफले॥आनायेदंभभेदेचवस्त्रभेदेचजालिका॥७५॥
बालकोऽस्तेशिशौकेशेवाजिधारणबालधौ॥अंगुलीयकरीवेरपरिहार्येचबालकं॥७६
बाईकंदृढसंघातेदृढत्वेदृढकर्मणि॥मामकंममतायुक्तेमातुलेमामकःस्मृतः॥७७
याजकोयाजिनिख्यातोयोजकोराजकुंजरे॥साल्वकोघातिविहगेपण्यानांचग्रहीत
रि॥७८॥दारकोभेदकेऽपत्येरात्रकंपचरात्रके॥येनवेश्याग्रहेनीतोवत्सरंतत्ररात्र
कः॥७९॥लासकोलसकेलास्यकारिण्यपिमयूरके॥शार्करकः शर्करापिंडेदुग्धफेने
चशार्करकः॥८०॥तारकः कितवेचौरेगद्यविस्तारभेदयोः॥स्वास्थ्यकारव्याचवाद्दि
वेस्यकरादेरपिबुद्बुदे॥८१॥द्रावकस्तुशिलाभेदेविद्रधेदोषकेपिच॥भ्रामकोजंबु
केधूर्तेसूर्यविर्त्तोशमभेदयोः॥८२॥किण्वाकःसिल्हकेहिंगौतिलचूर्णेचकुंकुमे॥विना ४
कोहरकोदंडेपांसुवर्षत्रिशूलयोः॥८३॥कालकः श्लेष्मवाकोस्यात्सीनमस्तकशोकयोः॥

क्षारकः पक्षिमत्स्यादिपाशकेजालकेपिच॥८४॥पाठकःस्यान्महाविल्वेकोटकांतरवा
ययोः॥अक्षादिडोलनेमूलेमूलद्रव्यापचयरोधसोः॥८५॥वल्कःसंगरशोच्येपारा
वतेखनखड्गयोः॥पुल्लकस्तुलघान्येस्यादास्येयभटशालके॥८६॥किल्लाकःकीर्त्यते
स्वेदोपरिणामेचदुर्गतौ॥लिप्तकःपवनेस्वेदेप्यसत्कर्मफलेपिच॥८७॥लंपाकोलं
पटेदेशेकिंपाकःफलमूर्खयोः॥संपाकःस्तुककेवृक्षेसंपाकश्चतुरंगुले॥८८॥मो
चाकः कदलीसिग्रुनिर्मोचकविरागिषु॥मेचकोगजलोमूलमूलपर्णेतघूकयोः॥८९
मेषकोबर्हिचंद्रेस्यान्मेषकः श्यामलेपिच॥तिमिरेलक्षवर्णेचमेषकंवाचुचुंबेत्॥९०
यूथकः सेवनद्रव्येबाधकेवृषदंशके॥पिशुनेशुनिकाकेचसेवकः सेवकेमयोः॥९१॥
लोध्रकोमांसपिंडेस्याद्दक्षितारेचकज्जले॥लट्वाठाभरणेस्त्रीणांकदलीनीलवस्त्रयोः॥
९२॥निर्बुद्धोकर्म्मपूरेचमौर्ख्यमूर्खथकर्मणि॥मोदकोहर्षुकेतेयःखाद्यभेदेचमो
दके॥९३॥रोमकः पाकवल्मीकरूक्षकोशशिरस्त्रके॥गोमकोविधवापुत्रेजारोजन्म
निकेगुरौ॥९४॥शूलकोगुणवृक्षेस्यान्नेलपात्रेकुकुंदरे॥उदरांतेंगनायांचकपिकाभो

विश्व० ५

गतोपले॥९५॥मूलकः कुमिशैलेचप्रतीरस्तूभयोरपि॥मूलकं नाकेधूर्तैकाव्यालंकर
णेविदुः॥९६॥चूतकः कूपकेऽप्यास्तेचूतकंरसजन्मनोः॥सूतकः स्यात्मशौमिन्नेसूच
कः प्रावटेरसे॥९७॥कीचकोदैत्यभेदेचस्यूकवंशेऽपुमांतरे॥कीटकः कुमिजातौस्यान्नि
ष्ठुरेकीटकोन्यवत्॥९८॥जीवकः पीतशालेस्यात्तृणपूर्णेऽपि जीविनि॥सेविनि प्राणि
केप्याहितुंडिकेपादपांतरे॥९९॥आजीवेजीविकामाहुर्जीवंत्यामपिकुत्रचित्॥हीव
केवागलंकारेहीयकोमिकारके॥१००॥सेवकस्तुप्रसेवेस्यादनुजीविनिचान्यवत्॥१॥
चौरकोधिक्रियालेखेपतंग्यांचीरिकामता॥×अशोकोवंजुलेमानद्रुमनिःशोकयोर्मु
नेः॥अशोकाकटुरोहिण्यामशोकंपादपेस्मृतं॥२॥आलोकोदर्शनेद्योतआलोकोवै
दिभाषणे॥पेटकंपुस्तकाधानंमंजूषायांकरंडके॥३॥हेतुकोबुद्धिभेदेस्यान्महाकाल
गणेपिच॥धेनुकंकरणेस्त्रीणांधेनूनामपिसंहतौ॥४॥वेलंकंसिंधुतैलेचहेतौसर्वकु
रेपिच॥कोरकंकुड्मलेविद्यात्कोलकंमृणालयोः॥५॥विवेकः स्याज्जलक्षीण्योर्विचा
रेपिरहस्यपि॥गोरकंकनकेधातौप्रसेकःसेचनेऽमृतौ॥६॥कौलुकंचामिलाषेस्याद्

५

स्नेहनर्महर्षयो॥परंपारासमायातमंगलेचकुतूहले॥७॥विवाहसूत्रगीतादिभोगको
लेषुचस्मृतं॥कौशिकोनकुलेव्यालग्राहेगुरुगुलशक्रयोः॥८॥विश्वामित्रेचकोशल्लो
लूकयोरपिकौशिकः॥कौशिकीचंडिकायांचनदीभेदेपिकौशिकी॥९॥प्रतीकोऽवयवे
प्राकःप्रतिकूलविलोमयोः॥धूलीकमपिभूनिंबतिप्यकर्पूरकट्टणे॥१०॥अभीकंका
लुकेक्रूरेकवौचभयवर्जिते॥वल्मीकोवामलूरेस्यान्मुनिरोगविशेषयोः॥११॥अलीकं
कुरणेसैन्येव्यलीकोनारेस्मृतः॥मलीकमप्रियाकार्यावैलक्ष्येषपिपीडने॥१२॥नालीक
कंपद्मषंढेऽलोनालीकःशरतल्पयोः॥अलीकमप्रियेप्रोक्तमलीकमनृतेदिवि॥१३॥
अलकंतुकुलेशीलेपक्ष्मकोगतजन्मनि॥उलूकः कुरुयोधेस्यात्सेचकेजंभभेदिनि
॥१४॥शंबुकोगजकुंभीनेदैत्यभेदेवराटके॥बंधूकंबंधुजीवेस्याद्बंधूकः पीतमालु
के॥१५॥मंडूकोबंधुभेदेपिदुर्दुरेशोणकेविदुः॥मंडूकपर्ण्यांमंडूकोवर्णकश्चारणेस्मृ
तः॥१६॥विलपनेचंदनेपिवर्णकंस्यादथार्भकः॥शिंशपासूरवैद्यशोभूणेवर्णकोऽश्व
खुरेखगे॥१७॥पुष्पकंचीरिकानेत्ररोगयोरत्नकंकणे॥कुबेरस्यविमानेचकासीसे

चरसांजने॥१८॥लोहकांस्येमृदंगारेशकद्यामपिपुष्पके॥पूर्णकःस्वर्णचूडेस्यान्ना
शाख्यांतुपूर्णिका॥१९॥दर्शकःस्यात्प्रतीहारेदर्शयित्रप्रवीणयोः॥पद्मकंपद्मका
ख्यंच विदुजालकयोर्मले॥२०॥दीप्यकंचाजमोदःस्याद्यवानीबर्हिचूडयोः॥सस्यकः
स्यान्मणौखड्गेनालिकेरस्यचांतरे॥२१॥रक्तकोम्लानबंधूकरक्तवस्त्रानुरागिषु॥चित्र
कःस्यात्तरव्याघ्रभेदयोर्नैषजांतरे॥२२॥रुक्मिकस्तुद्रुणेरात्रौश्लेष्मकीटेतथौषधे॥अंशु
कःसूक्ष्मवस्त्रेस्याद्वस्त्रमात्रोत्तरीययोः॥२३॥अंशिकेनिकटेचुल्यामंशिकासानलौष
धे॥तथाज्येष्ठभगिन्यांचनाथोकाकीर्त्यतेंशिका॥२४॥स्वस्तिकोमंगलद्रव्येचतुष्कगृहभे
दयोः॥पिष्टकस्यविकारेचस्वस्तिकोरत्नतालके॥२५॥कंचुकोवारवाणेस्यान्निर्मोकेवचे
पिच॥वर्द्धयकग्रहितांगस्थितवस्त्रेचचोलके॥२६॥ओषधेकंचुकीनाथकंचुकः खलधू
तयोः॥जंतुकेगृहबभ्रौचगृत्यकेछकनिघ्नयोः॥२७॥वंशकःस्याद्विनिमयेपुंश्चलीस्या
च्चवंशुकी॥गोशिकंलेखकेप्राहुःसुगंधव्यवहारिणि॥२८॥यवशिकंपिप्पलीमूलेवंशिको
गुग्गुलद्रुमे॥मात्रेयेचकरीरेचवरेवेत्रेचप्रकीर्तितः॥२९॥वालिकोदेशभेदेऽश्वेवालिकंवी

रहिंगुनोः॥अनयोरपिवालिकोयाज्ञिकोयाजकेकुशे॥३०॥बार्षिकंत्रायमाणेस्या
द्वर्षाकालभवेन्यवत्॥स्वर्णिकोमहिषीक्षीरफेनसोनिकयोरपि॥३१॥आर्किकंदिननि
र्वर्त्यभोजनेनित्यकर्मणि॥मुंडिकोमल्लधूर्तोकलोक्तिस्नेहपात्रयोः॥३२॥गोडकःखड्गि
निख्यातःसंख्याविद्याप्रभेदयोः॥अवछेदंतरायेचगंडकीसरिदंतरे॥३३॥तंडकःखंज
नेफेनेसमासप्रायवाचिच॥गृहद्वारोत्तरुस्कंधमायाबहुलयोरपि॥३४॥कंडकःक्षुद्र
शत्रौचकर्मस्थानकदोषयोः॥रोमांचेचद्रुमांगेचकंडकोमरकेपिच॥३५॥तुंडकःफ
णिभेदेचवर्हिकिंद्रुमभेदयोः॥पक्षकःपार्श्वमात्रेचपक्षवीरेचपक्षकः॥३६॥शंकवंच
लयेकंबोशिरोभागेचशंखकः॥नेष्टकोहरिखड्गेचहर्षकेकुलपालके॥३७॥शीतकः
शीतकालेचस्फटिकेतीर्घसत्रिणि॥उष्णकस्तुनिदाघेस्यादातुरेक्षिप्रकारिणि॥३८॥
उकुंभोगंधकुटुपास्याद्धिंगाभ्यवकाशके॥रेणुकःशाणकेक्रूरेक्षुद्रकःस्यान्नीचयोः
॥३९॥पिप्पलोनेत्ररोगेस्याद्वान्याद्यिचमसेपिच॥भस्मकंरोगभेदेपिविडंगफलधौत
योः॥४०॥कुंचकःस्याद्बृहद्गुरुधूर्तीयस्फोतकामुके॥जंबुकःकरवेनीचेप्रतीच्यांदि

स्यतावपि॥४१॥कार्मुकंवंशधनुषाःकर्मशक्रेतुवाचतु॥निर्मोकोमोक्षकेत्वक्सिन्ना
हेसर्पकंचुके॥४२॥हुडुकोवाद्यभेदेस्याद्वास्मूहेमदमत्तके॥तुरष्कःसिल्हकेम्लेच्छजातौ
श्रीवासकेकचित्॥४३॥इक्ष्वाकुःकटुतुंब्यांचसूर्यवंशनृपेपिच॥कुशाकुस्तुराधर्षदुः
शीलेचबिलेशये॥४४॥चुक्राकुर्मकरेभानौपरोक्षापिनिपाचके॥पृक्काकुर्दृश्चिकेव्याघ्रेचित्र
केचसरीसृपे॥४५॥मृक्सकुरनिलेवज्रेदावाग्नौप्रतिसूर्यके॥गोरंकुःपक्षिजातौचभवेभग्न
कबंहिनोः॥४६॥त्रिशंकुःशलभेराजविशेषेक्षपदंशके॥पल्यंकोमंचपर्यंकस्तीपर्यस्ति
कासुच॥४७॥कदंकोमस्तकेसस्यनालिकेरफलास्थिषु॥कलंकोकेऽपवादेचकालायस
मलेपिच॥४८॥भालंकःकरपत्रेस्याच्छाकभेदेचरोहिते॥महालक्षणसंपूर्णपुरुषेकथ
येहरे॥४९॥शृंकःशंकरेसाधोभक्षीतकमहिल्लयोः॥अंसकोरोगसंतापशंकासुमरु
जध्वनोः॥५०॥पालंकःसल्लकीशाकभेदयोर्वाजिपक्षिणि॥अर्कोधवलार्कैस्याद्रोगन्मा
दितरुक्षुरे॥५१॥उरुर्कोऽप्यर्कालीयफलमदनकंटके॥संवर्कःस्मरतेपृक्तोविवर्कःसंश
योहयोः॥५२॥अंबिकापार्वतीपांडुजनन्यारपिमातरि॥अंधिकाकैतवेसिद्धेसर्षप्याम

पिकीर्त्यते॥५३॥अलिकात्रिंति डीकाम्लोऽरत्नेगेरिकासुच॥यूथिकाम्लानकेपुष्पवि
शेषेपिचयूथिका॥५४॥रालिकापिचकेहारराजसर्षपरेषयोः॥रसिकापिरसालायांकां
चीरसनयोरपि॥५५॥कुंडिकाद्वारपिंड्यांचवृत्तिकायांरणक्षितौ॥भृंगिकारचनायांस्यान्
मृत्यैनरपरिग्रहे॥५६॥कर्णिकाकरिहस्ताग्रेकरमध्यांगुलावपि॥क्रमुकादिछदांशेचकर्णि
काकर्णभूषणे॥५७॥बीजकोशेसरोजास्यकुक्षिन्यामपिकुत्रचित्॥कल्किकाकथ्यतेऽत्यंत
सूक्ष्मवस्तुनिमंथयोः॥५८॥गलिकायूथिकावेश्यानकोरिकरिणीषुच॥गण्डकोपिचदेवज्ञे
कारिकानवयोषिति॥५९॥लतोविवरणश्लोकेयातनायांचकासिका॥नापिनादिकशित्वे
पिजालिकाजालिनीफले॥६०॥भटानामस्मरचिंतांगरक्षिण्यांचकालिका॥गिरेसारेजलो
कायामपिस्याद्विधवास्त्रियां॥६१॥जालिकःपुनरुद्दिष्टोग्रामकूटेचधीवरे॥मौलिकानी
लीनीक्षुद्ररोगशेफालिकासुचि॥६२॥कालिकायोगिनीभेदेकालीगोर्योचनावलौ॥क
मदेयदस्तुमूल्येधूम्रीनवमेघयोः॥६३॥परोक्षशारवानीमालतीमांसीकाकीषुकालिका॥
तथारश्विकपत्रेपिमालिकासरिदंतरे॥६४॥ग्रैवेयेपुष्पमालायांपक्षिमक्षेचमालिका॥वा

लिका वालुका वाला पिछोल्य कर्णभूषणे॥६५॥ तूलिका कथिता लेख्यकूर्चिका तूलशे-
खरे॥ तूलिका नारकस्यांके कर्णमूले चरंतिनी॥६६॥ मल्लिका तृणश्रेष्ठेपि मनमत्यां च भेद
योः॥ मल्लिकोहंसभेदोऽथ स्त्रिल्लिका शल्लिकापि च॥६७॥ विलेपनेऽस्त्रिल्लामातयस्यरुचि-
स्मृता॥ वालुका सिकतासुस्यात् वालुकं त्वेलवालके॥६८॥ नप्तिका पिकुमार्यांस्यादथक्ष
पणवंहिनोः॥ नप्तिको धेनुकाघेनौ स्त्रीकरेणुप्रसूनयोः॥६९॥ रेणुका पिहरेणोस्याज्जमद
ग्निस्त्रियामपि॥ जतुका जिनपात्रार्यांजतुकं हिंगुलाक्षयोः॥७०॥ कूर्चिका सूचिकायांच
तूलिकायांच कुञ्चले॥ कपर्यांकुहकेक्षीरविहृतावपि कूर्चिका॥७१॥ मातृका धातृका
मात्रोर्मातृकाकरुणस्वरे॥ पत्राका वैजयंत्यांच सोमाख्ये कध्वजेपिच॥७२॥ स्यात्पुत्रिका पु
त्तलिकादुहित्रोर्यांच तूलिके॥ पुत्रकः सरलेधूर्तेशेवदृक्षप्रभेदयोः॥७३॥ उद्भिका मृत्ति
काभांडभेदेपि करभस्त्रियां॥ शमीका नीलिकायांच शमीको नागवृक्षयोः॥७४॥ दूतीका
तूलिकायांच दूतीकानेत्रयोर्मले॥ ऊर्मिका त्वंगुलीयेस्यादूस्त्रभंगतरंगयोः॥७५॥ तथो
द्धाहुलकेपिस्याद्ऊर्मिका मधुपध्वनौ॥ स्याच्छलाका पिमदनसारिकाशल्ययोःशरे॥७६॥

छत्रपंजरकायांच शलाकीं पशुदृक्षयोः॥ नर्तकी लासिकायांच करेणावपि नर्तकी॥
७७॥ नर्तकः पल्लवेपोटगलच्चारयोर्नरे॥ चुलुकी शिशुमारेपि कुडौ भेदे कुलांतरे॥७८
चुलुकी मसकहर्यांच चक्षुकीयष्टिकांतरे॥ ॥ कश्चतुर्थः॥ ॥ अलमकः पिकेभेके
मधुकेपद्मकेसरे॥७९॥ भवेद्भल्लिका भृंगेकोकिलेरतहिंडिके॥ स्मृतः कुरबकः शोणा
म्लानश्रिंशीप्रभेदयोः॥८०॥ भवेत्कुरबकः पुष्पविशेषमदनद्रुमे॥ बलाहको गिरौमेघे
दैत्यरागविशेषयोः॥८१॥ भृंगराजो जलेभृंगे गिरिकेचूर्णकुंतले॥ वसंतकः स्थूलरजोप
मबीजेकपद्दीपे॥८२॥ शृंगाटकंभवेद्वारिकंटकेचचतुःपथे॥ गोकंटको गोक्षुरकेस्वयु
ग्वेचगवांखरे॥८३॥ आकल्पकस्तमोमोहगंधाचुत्कलिकासुरोः॥ आखेटको मिलन्याघ्रे
निंदाकरेपिच॥८४॥ प्रघाटकः शिराघातेदंशुकेशिरवेउके॥ संदंशकः स्फरश्रेष्ठेमनो
ज्ञेपुनरन्यवत्॥८५॥ निकामकः कर्णधारेपोतवाहेनियंतरि॥ विनायकस्तुहेरंबेतार्क्ष्ये
विघ्नेजिनेगुरौ॥८६॥ निश्वारकः पुष्पस्यक्षयेस्वैरेसमीरणे॥ भृंगारकः स्करेराशिकथित
स्रुतपोधने॥८७॥ हारीतकः स्यात्करभेरासीपुत्रेच धीवरे॥ अंगारकः कुजेविद्याद्रुमको

शेकुरंटके॥८८॥अंगारकेक्षुकांडेस्यात्कोरकेकिंशुकस्यच॥दलाटकस्तुकुंटेस्यात्क
र्णिकर्णशरीषयोः॥८९॥स्वयंजातंतिलेफेनेस्नानकेनागकेसरे॥वात्यायांप्रस्निकायांच
गौरिकेचमहत्तरे॥९०॥भवेत्पूर्णानकंपूर्णपात्रेपरहपात्रयोः॥प्रकीर्णकंग्रथभेदेचाम
रेविस्तरेहये॥९१॥स्मृतःपुष्कालकोगंधमृगेक्षणकीलयोः॥कोशातकःकचेज्येत्स्नापयो
लोधकेतुषु॥९२॥कोशातकीवाणिजकेवडवायोवणिग्घपि॥निर्व्ययकःस्यात्क्षपणेनिः
कलेप्यपरिच्छदे॥९३॥स्याद्दंशनकमुद्यानेमालुकछेदनेपिच॥मंडोलकंचित्तरोगेभवेद्रा
ज्ञेपिच॥९४॥शलाकीकोमुनेर्भेदृहेचाथखरालिका॥ग्रामणीर्भिंडिनाराचोपधानेषु
प्रयुज्यते॥९५॥लेखीलकोलेखहारेपस्तुहस्तेविलेपयेत्॥लेखेषुपरहस्तेनतत्राप्येष
प्रदर्शितः॥९६॥भवेन्मंडलकंबिंबेकुष्ठभेदेचदर्पणे॥पिप्पलकंस्तनरोगेमतंसीवनसू
त्रके॥९७॥पिंडितकःस्यान्नगरेमदनद्रोफणिजके॥त्रिवर्णःकगोक्षुरकेत्रिफलायांकटुत्रि
के॥९८॥शलाटुकःसृगालेपिसारमेयबलीमुखे॥कोलेयकःकुलत्थेस्याद्विड्वराहकाम
ुके॥९९॥कपर्दीकःशोभनांगेभवेदीशानदिग्गजे॥जैत्रकःहशेचेद्रेभेषज्यायुष्मतो

रपि॥२००॥स्वस्तिकेस्याद्दिवसेसुखास्तानेशुभंगले॥वैनायिकःस्यात्क्षणिकेपरतंत्रो
ह्यनाभयोः॥२॥वैदेहिकोवाणिजिकेभूद्राद्रेश्यासुतेपिच॥विनुन्नकंतुधान्यार्केतथाऽ
ज्ञानलोष्ठयोः॥२॥गोकुर्विकःकेरकेस्यात्संकरेगथकेकरे॥भार्याहृकोभवेज्जार्यानिजि
तेहरिणांतरे॥३॥कापठिकोन्यकर्मज्ञाछात्रेस्यात्कालदेशिनि॥कौक्कुटिकोरागिकेस्या
दूरप्रेरितेक्षणे॥४॥लालाटिकःप्रभोर्भीलदर्शिन्याश्लेषणांतरे॥कार्यीक्षमेव्याकुलित
शिलाटकेललाटयोः॥५॥कर्कोटकःस्यान्मात्स्यरकार्द्रवेयप्रभेदयोः॥नरंटकःस्यान्मा
तंगवेद्योयोवनकंटके॥६॥संवर्तुलेथारवनिरुश्चौरेक्रोडेचमूर्खके॥वैतालिकोबोधकरे
खिटिनालेप्युदीरितः॥७॥शितिकंठकस्तुखदिरेवरुणेपसंदरे॥मयूरकोप्यपामार्गेनुच्छ
केतुमयूरके॥८॥विशेषकःस्यात्तिलकेविशेषावाहकेपिच॥विदूषकश्चाटुपटौपरनिं
दाकरेपिच॥९॥भवेत्तैषतकंमातृयात्रामंगलसूत्रयोः॥तथासंन्यस्तसंदेहजीवक्ष
पणकेघपि॥१०॥लुब्धकःस्मृतोधीरेशठेवाकूशुनिवर्जिते॥वर्त्तकःक्षोनरीभेदेकान
नीकेजलानरे॥११॥कक्कसःकोप्यलूकःस्यान्निःस्वेस्त्रीजितदभयोः॥रिंगवेरभीरुकेच

दंदशूकोहिरश्वसोः ॥१२॥ मशकस्तुकोवदंन्येपिमशाशिन्यतिथिद्विषि॥ कृकवाकुर्मयू
रेपिसरटेचरणायुधे॥२३॥ गंधकंकुसुनाशीरेशीकरेचघनोपले॥ कलविंकःस्मृतोग्रा
म्यचटकेपिकलिंगिके॥२४॥ सोगंधिकंतुकल्हारेपद्मरागेचकतृणे॥ गंधोपलेगांधिके
तुसोगंधिकइतिध्वनिः॥ २५॥ सोमवल्कस्तुधवलखदिरेकज्वलेपिच॥ भयानकःस्म
ताव्याघ्रसिंहिकेपिभीषणे॥२६॥ पुंडरीकंसितांभोजेसितछत्रेचभेषजे॥ कोपकारांतरे
व्याघ्रपुंडरीकोऽग्निदिग्गजे॥२७॥ जर्जरीकंबहुछिद्रेजर्जरीकोजरत्तरे॥ बर्बरीकोम
लाकालेकेशविन्यासशाकयोः॥२८॥ वर्तुरीकंवर्तुलेस्यात्तर्तुरीकस्तुपारगे॥ कर्करीक
श्चवेरेस्यात्कर्करीकंतुमाईवे॥२९॥ भवेत्कलिकोकंठग्रहेलासलिलबीचिषु॥ ह
गालिकाशिवायांस्यात्त्रासादपिपलायिते॥३०॥ चेडिलिकाकंदरायांसुनायामोष
धीभिदि॥ पंचालिकाभवेद्वस्त्रपुत्रिकागीतभेदयोः॥३१॥ कनीनिकातारकेस्युःस्या
त्कनिष्ठांगुलावपि॥ भवेत्कुणालिकाकृत्येशुन्यांकेपाटनिश्चितौ॥३२॥ सेनानिकापिक्षी
रापिसरेमर्कटजालिके॥ संदंशिकापिसुत्तुंडीलोहयंत्रविशेषयोः॥३३॥ संघातिकातु

१०

युग्मेस्यात्कुहिनीप्राणमोरपि॥ जीवंतिकापिजीवाख्याशाकवंरागदूर्विका॥३४
पिंपाकहरितिकापिस्यामूरुवस्त्रप्रभेदयोः॥ बहेरुकाबलाकापिद्वातावर्जितशारवयोः
॥३५॥ स्मृतावघंटिकास्तुद्रघंटिकामहधान्ययोः॥ वाद्यप्रभेदवाद्यत्रदेवयोरापगीत
रे॥३६॥ ॥कः पंचमः॥ ॥स्याद्वाडुरिकंहासनरथांगप्रभेदयोः॥ गोजाहितकमि
स्याद्गवेडलेकंटकारके॥३७॥ स्यात्कलिंकरकंचित्राविडंगादुबरेपुच॥ खदिरसंतकदु
स्येषवासंत्वामदनोत्सवे॥३८॥ कक्षावेक्षकमिंछतिशुद्धांतोद्यानपालयोः॥ खरपाले
कवौखिंगेरंगाजीविन्यपिकचित्॥३९॥ नागवारिकउद्दिष्टोराकुंजरहस्तिपे॥ गाणिक्य
राजेगरुडेचित्रमेखलकेकचित्॥४०॥ स्याद्ध्रीहिराजिकःकामलिकायांवीतधान्यके॥
सीतपेचैकशष्टायंस्यादातर्पणहीपयोः॥४१॥ अथोजलकरकःस्याद्भालिकेरफले
चुरे॥शरेचजलनायांचकथनेजलनायकः॥४२॥ काकवीराजशफरमत्स्ययोःकट
वादकः॥ कादंबेकाचकलमेबलिपुष्टेचजंतुके॥४३॥स्याद्दिलिमिलिकाकंटीभेदरत्नयो
नविद्युतोः॥ स्याद्भवफलिकानाम्नेनचजातरजःस्त्रियां॥४४॥ स्याच्छतपर्विकापूतीव

DR BHAU DAJI

चयाह्वपकारिका॥ पिष्टभेदे गृहे राज्ञामुपकर्त्यामपीष्यते॥३५॥स्याद्वचहारिकालो
कयात्रासम्मार्जनीगुडी॥स्याद्धेमपुष्पिकामूर्ध्वांचंपकेहेमपुष्पकः॥३६॥ ॥
कःषष्ठः॥ ॥लतामर्कटकःपुंस्यानवमाल्यांप्लवंगमे॥सिंदूरतिलकोनागेसिंदूरति
लकास्त्रियां॥३७॥वर्णविलोडकःश्लोकलताया हारिणिकुंतले॥मातुलपुत्रकोभूर्जफले
स्यान्मामकात्मजे॥३८॥ग्रामसुंजरिकाशृंग्यांग्रामयुद्दचकीर्त्यते॥स्यान्मरुशिला
कापिस्यांकामोद्दयोषधौ॥३९ ॥५७॥इतिकोतवर्गः॥५७॥ ॥ ॥खण्डकः॥
खमिंद्रियेसुरेखस्वर्गेशून्यबिंदुविहायसि॥पुरेसंवेदनेक्षत्रेकुणाहलफलेक्वचित्॥४०॥
खोद्वितीयः॥ ॥नखक्षरसूहेपंक्तेगंधद्रव्येनखेनखी॥सुखेनिःसरणेवक्त्रेप्रारंभो
पाययोरपि॥४१॥सुखंशर्मणिनाकेचस्करवापुर्यांप्रचेतसः॥सखोलेखसुरेलेखा
लिपिराजिकयोर्मता॥४२॥दुरवःसंपन्मनोतेपिसामः षड्व्रणेषपि॥शंखोनि
ध्यंतरेकंबुललाटास्थिनखीपुच॥४३॥शिखाशिफायांचूडायांज्वालायामग्रमा
त्रके॥लांगल्यांचापिशाखायांचूडायांचशिखंडिनः॥४४॥सखामित्रेसहायेचशाखापं

स्यांतरेभुजे॥शाखावेदविभागेचपारंपर्यंतिकेपिच॥४५॥शिखापर्यटनेदृत्येभवे
दश्वगतावपि॥शिखागतिविशेषेविष्णुकशिर्यांचनर्तने॥४६॥ ॥खस्तृतीयः॥
त्रिशिखंशिखरेविद्यात्शूलेचराक्षसांतरे॥सकुसुखस्तार्क्ष्यनयेफणिभेदेचपंडि
ते॥४७॥दुर्मुखोनागराजेपिमुखरेवानराश्वयोः॥गोमुखंकुठिलागारेवाद्यभांडेच
लेपने॥४८॥प्रमुखःप्रथमेश्रेष्ठेविशिखस्तामरेशरे॥शस्त्रीखनिन्योर्विशिखानलि
कायामपिकचित्॥४९॥विशाखस्तर्ककेस्कंदेविशाखर्क्षकविलयोः॥वैशाखोमासि
पारवेवैशाखंगंधवेश्मयोः॥५०॥क्षीयूखममृतेदुग्धेमयूखःकरतेजसोः॥ ॥
खश्चतुर्थः॥ ॥पंचनखोगजेकूर्मेशिलीमुखोऽलिबाणयोः॥५१॥भवेद्व्याघ्रनखः
केरगंधद्रव्यविशेषयोः॥महाशंखोनरास्थिस्यान्निधिसंख्याप्रभेदयोः॥५२॥इंदुले
खामृतासोमलतानाशशिकलासुच॥शशिलेखाकलाभागेवाकुचीकृतभेदयोः॥५३॥
अग्निशिखालांगलिक्यांकुंकुमेऽग्निशिखंमते॥वह्निशिखोजठरायोस्याद्वालेचवह्निशिखो
मतः॥५४॥ ॥खंडःपंचमः॥ ॥स्यान्मीलितमुखंःप्रेतेगोलांगूलेखलेनले॥अथ

शीतमयूखोपिशशांकघनसारयोः॥५५॥सर्वतोमुखमाख्यातमंतरिक्षेचपाथसि॥वि
धिक्षेत्रज्ञनरेषुकथितःसर्वतोमुखः॥५६॥ ॥७॥इतिरोगवर्गः॥७॥ १॥
गएकः॥ ॥गौःस्वर्गेवृषभेरश्मौवज्रेचद्रुमसिस्मृतः॥अर्जुनीनेत्रदिग्बाणभूत्वाग्व
रिषुगोर्मता॥५७॥ १॥गोद्वितीयः॥ ॥अगःशैलेद्रुमेभानौमगवत्यवनाशने॥
खगःसूर्येग्रहेदेवेमार्गणेचविहंगमे॥५८॥भगमैश्वर्यमाहात्म्यज्ञानवैराग्ययोनि
षु॥यशोवीर्यप्रयत्नेच्छाश्रीधर्मरविमुक्तिषु॥५९॥युगंहस्तचतुष्केपिरथसीरांगयो
र्युगः॥युगंहनादेयुगलेरहितामोषधेपिच॥६०॥मृगःपशौकुरंगेचकस्तिनक्षत्रभे
दयोः॥याज्ञायांमृगयायांचमृगीतुवनितोतरे॥६१॥भृगुःशुक्रेप्रपातेचऋजमर्
गेपिनाकिनि॥भागोरूपार्धकेप्रोक्तोभागधेयेकदेशयोः॥६२॥नागंतुसीकेसरंगे
स्त्रीबंधेकरणांतरे॥नागःपन्नगमातंगकृशचारेषुचोदये॥६३॥नागकेसरपुन्नाग
नागदंतकसुस्तके॥देहानिलप्रभेदेचश्रेष्ठेस्यादुत्तरस्थितः॥६४॥रागोनुरक्तोमात्स १२
र्येकुशरोलोहितारिषु॥गांधारादौनृपेरागस्त्यागोवर्जनरंजनयोः॥६५॥भोगःसुखे

धनेचाहेःशरीरकणयोर्मतः॥पालनेभ्यवहारेचनिर्वेशेपाण्ययोषितां॥६६॥योगोऽ
पूर्वार्थसंप्राप्तौसंगतिध्यानयुक्तिषु॥वपुःस्थैर्यप्रयोगेचविष्कंभादिषुभेषजे॥६७॥
विश्रब्धयातिरिज्योपायसनहनेषधि॥कार्मणेपिचयोगःस्याद्रोगःकुष्ठेषधेगदे॥
६८॥वेगोजवेप्रवाहेचमहाकालफलेपिच॥पूगस्तुक्रमुकेदेवेगःशोभनरक्षयोः॥
६९॥अंगंगात्रांतिकोपायप्रतीकेषप्रधानके॥अंगोदेशविशेषेस्करंगसंबोधनेऽव्य
यं॥७०॥इंगःस्यादद्भुतेलाभेजंगमेगीतयोरपि॥टंगोलपाणभेदेचजंघायांचस्त्रिकके
॥७१॥तुंगःपुन्नागनगयोस्तुंगःस्यादुन्नतेऽन्यवत्॥उर्वशीनिशयोस्तुंगीवंगंसीसकरं
गयोः॥७२॥वंगःकर्पासवार्ताकदेशभेदेषुभाषितः॥लंगःसेनेचसिंगेचव्यंगोहीनांग
भेदयोः॥७३॥भंगस्तरंगेरुग्भेदेजयविपर्ययोः॥भंगाशरण्यासख्येपिभृंगोध्व
स्याटखिंगयोः॥७४॥मधुव्रतेपिभृंगस्तुकेशराजगुडत्वजोः॥रंगोरणखलेरामेनृत्ये
रंगंत्रपुण्यपि॥७५॥लिंगंचिह्नेऽनुमानेचसांख्यात्मप्रकृतावपि॥शिवमूर्तिविशेषेपि
महत्तेपिप्रचक्षते॥७६॥शृंगंप्रभुत्वेशिखरेचिह्नेक्रीडानुयंत्रके॥विषाणोत्कर्षयोश्चा

थशृंगः स्यात्कूर्चशीर्षयोः॥७७॥शृंगी विषायामृषभेस्वर्णमीनविशेषयोः॥गोंग
स्तुगंगासंभूतेभीष्मशक्तिधरेपिच॥७८॥पिंगःपिशंगेपिंगीतुशम्योपिंगस्तुवालु
के॥रामठेनालिकायांतुपिंगागोरोचनामये॥७९॥रंगोगंडकशृंगाहिव्यूहभेदेषु
गंधके॥दुर्गःस्याद्दुर्गभेदुर्गागौरीनालिकयोरपि॥८०॥सर्गस्तुनिश्चयाध्याय मो
होत्साहात्मसृष्टिषु॥मार्गोमृगमदेमोसप्रभेदेऽन्वेषणाध्वनोः॥८१॥शार्ङ्गकार्मु
कमात्रेपिचिल्लोरपिशरासने॥वल्गुश्छागेमनोज्ञेचवल्गुभाषितमन्यवत्॥८२॥
फल्गुःप्रोक्तमलघ्वोश्चनिःसारेफल्गुवाच्यवत्॥सुंगीवराम्लातकयोःपर्कट्यामपि
विश्रुता॥८३॥ ॥गस्तृतीयः॥ ॥पन्नगःपन्नकाहेस्यात्सन्नगोऽपिभुजंगमे॥
खगोवानरभेकेसारथौचोक्षदीधितेः॥८४॥जित्सगोमृगेसर्वेविहंगःस्वर्गगेख
गे॥सर्वगंसलिलेख्यातंसर्वगःशंकरेविभौ॥८५॥आभोगोचरणेछत्रेपूर्णतायस्क
योरपि॥आयोगोव्याप्ततौगंधमाल्योपहाररोधयोः॥८६॥आयोगोविधुरेकूटेवि
श्लेषेकश्लिनेघने॥आशुगोमार्गणेबाणेप्युद्वेगःक्षुत्कीलके॥८७॥उद्वेगोप्युत्कोहुल

कोद्वेजनोत्क्रमकेषुच॥संभोगःसुरतेभोगेसंभोगोजिनशासने॥८८॥परागःपुष्परज
सिधूलिस्मानीययोरपि॥गिरिप्रभेदेविख्यातावुपरागेचचंदने॥८९॥प्रयागस्तीर्थ
भेदेस्याद्यज्ञेशनमरवाश्वयोः॥प्रयोगःकर्मणिप्रोक्तःप्रयुक्तेचनिदर्शने॥९०॥वालि
गःकथितोभोजेधातुवादिनिवानिगः॥तडागस्तुजलाधारविशेषेपत्रकूरके॥९१॥पु
त्रागःपुरुषेश्रेष्ठेपांडुनागेक्षितीतले॥जातीफलेचपुत्रागोनिसर्गःशीलसर्गयोः॥
९२॥विसर्गेस्यागवदाने विसर्गोमलनिर्गमे॥विसर्जनीयेप्यनप्रभेदेविविभावसोः
॥९३॥उत्सर्गोवर्जनेत्यागेसामान्यन्यायदानयोः॥त्रिवर्गोधर्मकामार्थेत्रिफलायांक
टुत्रिके॥९४॥वृद्धिस्थानक्षयेतत्वरजस्तमसिष्यते॥नातगुःक्षुद्रनालेस्याज्जनयि
त्रीहनेपिच॥९५॥अनंगोमदनेऽनंगमाकाशमनसोःस्मृते॥मृदंगःपटहेघोषेभु
जंगखिंगसर्पयोः॥९६॥पतंगशलभेशालिप्रभेदेविहगेरवौ॥पतंगंपारदेकापिन
रागस्तुवरेऽके॥९७॥शेफेनरंगमित्याहुर्निषंगंसंगतूणयोः॥विडंगंलोहमिश्रेख्यातं
विडंगोनागरेन्यवत्॥९८॥कलिंगःपूतिकरंजेधूम्यादेनीवरंतरे॥कलिंगंकुटजफ

लेकलिंगायोषितिस्मृता॥१९॥अपांगःसंगदृनेस्यान्नेत्रांतेतिलकेपिच॥वरांगंयो
निमातंगपुस्तकेषुगुडत्वचि॥२०॥पत्रांगःपद्मकेसूर्येपत्रांगेरक्तचंदने॥रथांगश्च
क्रयाकेपिरथांगंचक्रमिष्यते॥२१॥रथांगेविद्रुमेभौमेविद्यात्कपिलधीरयोः॥रथांगापि
चजीवेसोमातंगःश्वपचेगजे॥२२॥कलिंगोभूमिकक्कीरोहंतावलभुजंगयोः॥कालिं
गीराजकर्कंधाशारोगःखड्गनीर्थयोः॥२३॥हेमांगोद्रुहिणेतार्क्ष्येनारंगेपिच्यलीफले॥
नारंगेपिविरेजंतोयमजेःपिप्रकीर्तितं॥२४॥सारंगश्चातकेभृंगेकुरंगेचमतंगजे॥प
क्षिभेदेपिसारंगःसारंगःशबलेन्यवत्॥२५॥प्रियंगुःफलिनीकंगुपिच्यलीराजिका
सुच॥नीलंगुःकृमिजातोस्याद्भृंगराजीसुमारयोः॥२६॥तुरंगीचाश्वगंधायांतुरंगश्चि
त्रवाजिनोः॥वक्रांगीकटुरोहिण्यांवक्रांगोमांसोकसि॥२७॥नर् ॥गश्चतुर्थः॥ ॥
ईहामृगोवृकेज्ञातोप्रभेदेरूपकस्यच॥मल्लनागोभ्रमातंगेवात्स्यायनमुनावपि॥२८॥
उपरागःपरीवारेराहुग्रस्तार्कचंद्रयोः॥दुर्नयोग्रहकल्मोलेःपवर्गस्त्यागमोक्षयोः॥२९॥ २४
क्रियावसानसाफल्येप्यपवर्गःप्रयुज्यते॥उपसर्गःस्मृतोरोगाभेदेपप्लवयोरपि॥३०॥

समायोगस्तुसंयोगेसमवायेप्रयोजने॥सप्रयोयरतेविद्याद्विनोकार्मणेपिच॥३१॥
शीघ्रगःशंखलकेलेखहारेभेघवत्॥अभिषंगोयशःपथेस्यादाक्रोशेपराभवे॥
३२॥छत्रभंगोथवैधर्मेस्वांतध्वंसनपनाशयोः॥करभंगस्तुसख्यानांहस्तच्छेदेनृपाज्ञये॥३३॥ ॥गःपंचमः॥ ॥कथाप्रसंगोवाक्येविषवैद्येचवाच्यवत्॥नाडी
तरंगःकाकोलेहिंडुकेरत्नहिंडुके॥३४॥ ॥छ॥इतिगांतवर्गः॥छ॥ ॥
घोद्वितीयः॥ ॥अर्घेतुमसनेप्रोक्तमर्घंदुरितदुःखयोः॥अर्घपूजाविधौमूल्येप्यर्घिः
पादहरीतकीमूलयोः॥३५॥लघुर्मनोज्ञनिःसाराःगुरुष्वप्रथितोलघुः॥कृष्णागरुणिशीघ्रे
चपृष्ठांसेस्मृतोलघुः॥३६॥उर्वंशदेवयोवेगेद्रुतनृत्योपदेशयोः॥उर्वःपरंपरायां
चमेघःस्यान्मुस्तकेघने॥३७॥उघःस्यात्सारकेहस्तपुटकेदेहजालिने॥मोघोपिपा
टलायांस्यान्मोघोनिःफलितयोः॥३८॥मघामघोनक्षत्रेभेषजेचयथाक्रमं॥श्लाघा
माप्रशंसायांपरिषद्यीमिलाघयोः॥३९॥ ॥घस्तृतीयः॥ ॥अनघोनिर्मलापायम
नोज्ञेषुप्रभेघवत्॥पलिघःकाचकलशेघटेप्राकारगोपुरे॥४०॥पश्चोयोगभेदेस्त्रे

सुङ्गेरंगलघातयोः॥ प्रतिघः प्रतिघातेचरोषेचप्रतिघोमतः॥२१॥ काचिघः काननेप्रो
क्तश्छंदेमूर्केपिच॥ महार्घस्तुमहामूल्येनथालावकपक्षिणि॥२२॥ निशाद्योश्रीष्मका
लेस्याद्तप्तस्वेदांशुनोरपि॥ उल्लोपिशुचौहृद्येदक्षनीरोगयोरपि॥२३॥ सर्वाघोगुवेगा
र्थसर्वसन्नहनार्थयोः॥ अमोघः सफलेमोघाविडंगाभययोरपि॥२४॥ ॥७॥
इतिघातवर्गः॥७॥ ॥ ॥चोद्वितीयः॥ ॥कचः केशेगुरोःपुत्रेबंधेशुक्लव्रणे
कचः॥ कचाकरिण्यांकाचस्तुमणौशंखेमृदंतरे॥२५॥ नेत्ररोगेतुनीचस्तुवामनेपाम
रेस्मृतः॥ मोचःसौभांजनेप्रोक्तोमोचाशाश्मलिरंभयोः॥२६॥ पिचुस्तुलेचकर्षेचकुष्ठ
रोगेसुरांतरे॥ भैरवस्यास्यभेदेचपिचुःकापिप्रदर्शितः॥२७॥ कूर्चोविकल्पनेमध्येस्तु
वोस्मश्रुणिकेतवे॥ क्रौंचःखगनगद्वीपप्रभेदेषुप्रयुज्यते॥२८॥ कूर्चोमलादिनिर्मा
णेचंचातुतृणपोरुषे॥ चंचुपंचांगुलेग्रोष्ठांगोनाडीचेपिपठ्यते॥२९॥ शुचिःशुद्धे
नुपहतेशृंगाराऽऽर्द्रकयोःसिते॥ ग्रीष्मेहुनवहेपिस्याद्पधाशुद्धमन्त्रिणि॥३०॥ स १५
चिर्मरुवेशोभायामग्निषंगाभिलाषयोः॥ वीचिःस्वल्पेतरंगेस्याद्नर्काशेसुखेपिच॥
॥३१॥

भ्रूविकारेभिनयेनारीणांकरणंतरे॥ भ्रूचीचसीवनद्वेषेशचींद्राण्यांशतावरी॥३२
कांचिस्यान्मेखलादात्रिगुंजायांनीलदंतरे॥ वचास्याद्गंधगंधायांसारिकायांशुकेन
च॥३३॥ आर्चापूजाप्रतिमयोश्चर्चास्तोत्रकचिंतयोः॥ चर्चिकायांचरुकूर्शेभाकि
रणेऽसुकथ्यते॥३४॥ त्वचूचर्मवल्कयोश्चौम्येन्यग्रीवेनिम्नकार्ष्ण्योः॥ वाचवचने
सरस्वत्यांभाषागीर्भारतीयथा॥३५॥ ॥चस्तृतीयः॥ ॥कवचोगर्दभांडेस्यात्स
न्नाहेपरहेपिच॥ विकचःपक्षणेकेतुग्रहेचस्फुटिकेन्यवत्॥३६॥ कंकचःकरपत्रे
पिग्रंथिलाख्यद्रुमेपिच॥ संकोचमपिकाश्मीरेसंकोचोमीनवधयोः॥३७॥ नारा
चोलोहबाणेस्यान्नाराचोजऊहस्तिनि॥ नाराच्येषणिकायांचसम्यक्संगतहृद्ययोः
॥३८॥ प्रपंचसंचयेप्रोक्तोविस्तरेचप्रचारणे॥ मरीचिःरूपणेदीप्तावृषिभेदेचद
श्यते॥३९॥ कणीचिःपुष्पितलतागुंजयोशकरेपिच॥ अवीचीनरकेम्लेच्छेविपंची
कैलिकीणयोः॥४०॥ प्रायुरकूप्रत्यगिसेतेदिक्कूदेशकालतोव्ययं॥ प्राच्योदीच्य
प्रतीच्यानोयावकंस्यादनव्ययं॥४१॥ ॥चश्चतुर्थः॥ ॥मलिम्लुचोऽनिले

चोरेजलश्चिर्जलेऽप्येकयोः॥शृंगारेशिशुमारेचशृंगेत्रोटिप्रभेदेपिच॥ ॥चः पंचमः॥
रतनारीचइत्येषकथितोरतिवल्लभे॥कुक्कुरेरतनारीचसीत्कारेवरयोषितां॥४३॥ ॥
॥ ॥इतिचांतवर्गः॥७॥ ॥ ॥छोद्वितीयः॥ ॥अच्छःस्फटिकभल्लूकनि
र्मलेस्वच्छमयं॥आभिसुरव्येथकच्छःसारङ्गेपेतुभकच्छुमे॥४४॥नीकांगेपरि[illegible]धान
स्यपश्चाद्रंचलपल्लवे॥कक्षचीरि कायांचवराघांचनिगद्यते॥४५॥स्याद्गुच्छःस्तब
केस्तबेहारभेदकलापयोः॥पुच्छःपश्चात्प्रदेशेस्यालांगूलेपुच्छमिष्यते॥४६॥म्लेच्छः
पापरतेजातिभेदेस्यापभाषणे॥पिच्छातुशाल्मलीवेष्टेगंडेचाश्वपरातयोः॥४७॥पिं
क्कोपूगफलाकोशेमोचाषिंजपिलेषुच॥पिच्छेपुच्छेमहाकच्छःसमुद्रेचप्रचेतसि॥४८॥
॥ ॥८॥इतिछांतवर्गः॥८॥ ॥ ॥जएकः॥ ॥जूषकाशसरस्वत्यो
पिशाच्यांजवनेपिच॥ ॥जोद्वितीयः॥ ॥कजःकेशेविरंचेचकजंपीयूषपद्म
योः॥४९॥अजोहरौहरेकामेविधौछागेरघोःसुते॥व्रजोगोष्ठधुरंध्रेषुनिजमा
त्मीयरंध्रयोः॥५०॥ध्वजश्चिह्नेपताकायांध्वजःशौंडिकशेफयोः॥खड्गांगेचध्वजेर

केस्वजःप्रस्वेदपुत्रयोः॥५१॥द्विजोविप्रेऽण्डजेदंतेभार्गवेशुक्रयोर्द्विजा॥बीजेरत्नसि
तत्वेचहेतनावंकुरकारणे॥५२॥आधानेपिचसज्ञःस्यात्संनद्धेसंभृतेपिच॥वा
जमाज्येचयज्ञांतेवाजोनिस्वनपक्षयोः॥५३॥वाजंबलेमुनौवाजौछाजःशाक्या
पदेशयोः॥भुजःपाणौचबाहौचकुजःस्यान्नरकारयोः॥५४॥अज्जोधन्वंतरौचंद्रे
निचुलेशंखपद्मयोः॥कुज्जःस्यादथकुब्जेपिस्रुज्जःस्यात्स्यादपांतरे॥५५॥स्रुज्जं
तुकर्मरंगेस्यात्स्रुज्जःप्रोक्तःकुशाग्रचि॥अधोमुखेचकुब्जेचन्यज्जोवाव्यवहिय
ते॥५६॥आजिःसमाऽवनौयुद्धेराजिःस्यात्पंक्तिरेखयोः॥लाजास्याद्भृष्टधान्येषु
लाजास्यादार्द्रतंतुले॥५७॥उशीरेलाजमुद्दिष्टंप्रजाः संतानलोकयोः॥गुंजापि
परहेम्नोक्ताकाकचिंच्योःकलध्वनौ॥५८॥गंजःखनोसुराभेदेस्याद्भांडागारिऊयोः॥
गंजःकुंजोद्विकुंजेपिहनोदंतेचदंतिनो॥५९॥सजःप्रजापतौरुद्रेलेजःस्यात्सट्क
छयोः॥ऊर्जोबलेमहोत्साहेखजोमंथप्रहर्षयोः॥६०॥पिजास्तूलेहरिद्रायांपिंज
स्तुम्याकुलेन्यवत्॥पिंजोवर्धबलेपिंजंरत्नुर्वर्ण्यागुणेस्मृता॥६१॥खर्जूःकंडूंचं

किटे चरवर्जूरीपारेपिच्च॥ मर्जूः स्यादृजकेशुद्धौ सर्जूर्वणिजि विद्युति॥६२॥ ॥
जस्तृतीयः॥ ॥करजस्तु करंजेस्यान्नखेव्याघ्रनखेपिच॥ कुटजोवृक्षभेदेस्याद
गस्त्यद्रोणयोरपि॥६३॥सहजस्तुनिसर्गेस्यात्सहोछेपुनरन्यवत्॥ नीरजेकमले
कुशेजलजेशंखपद्मयोः॥६४॥बलजेगोपुरेक्षत्रेसस्यसंगरयोरपि॥ चलजावर
योषायांवस्तुमत्यामपिस्मृता॥६५॥कारुजःशिल्पिनांचित्रेकलमेनागकेसरे॥ स्व
यंजाततिलेफेनेवल्मीकेगैरिकेपिच॥६६॥बाहुजःक्षत्रियेकीरेस्वयंजाततिलेपिच॥
वनजोमुस्तकेपद्मेवनजेवनजोगजे॥६७॥वनजामुहुपर्ण्यांचचिंग्वांजिज्यजीवि
नि॥ वणिक्करणभेदेचवणिज्यायामपीष्यते॥६८॥सीमजस्तुगजेप्रोक्तःसीमोछेपुन
रन्यवत्॥ भूमिजोनरकेंगारेसीतायामपिभूमिजा॥६९॥गिरिजंचाभ्रकेस्यातंशि
लाजतुसुगंधयोः॥ लोहेपिगिरिजागौरीमातुलिंग्यारुहीरिता॥७०॥कंबोजोरुस्ति २७
नेदेपिशंखदेशविशेषयोः॥ अंगजंरुधिरेऽनंगकेशपुत्रगदेगजः॥७१॥कांबोजस्तु
रगेसोमवल्केपुभागपादपे॥ कोबोजीमाषपर्णीचहिंगुपत्न्यामपिक्वचित्॥७२॥अं

डजःकुक्कुटेस्यात्खगेमीनेसुजंगमे॥ कस्तूर्यांमंगजाप्रोक्तापरंजस्तैलयत्रके॥७३॥
फेनेचकरवालेचपुरंजस्तुरिकाफले॥ हिमजापिशठीगोर्यांमैनाकेहिमजःस्मृ
तः॥७४॥ ॥जश्चतुर्थः॥ ॥जघन्यजोनुजेशुद्रेभारद्वाजःस्मृतोमुनौ॥ द्रोणे
चवनकर्पासेभारद्वाजीतुकथ्यते॥७५॥भारद्वाजोगुरोःपुत्रेव्याघ्रादावेविहंगमे॥
काश्मीरजाख्यातिविकुंकुमेपीकरेस्मृता॥७६॥क्षीराब्धिजंतुसामुद्रलवणेमौ
क्तिकेकचित्॥ क्षीराब्धिजाश्रीर्यांप्रोक्तांचंद्रेक्षीराब्धिजोभवेत्॥७७॥द्विजराजः
शशधरेसुपर्णेऽनंतभोगिनि॥ धर्मराजोयमेस्यद्रेधर्मराजोयुधिष्ठिरे॥७८॥राज
राजःकुबेरेपिसावेभोमेसुधाकरे॥ भृंगराजस्तुमधुपेमर्कटेविहगांतरे॥७९॥ग्र
हराजोरवौचंद्रेप्यहिभुजंकेकिनाय्ययोः॥ यक्षराजशिवमित्रेचमल्लानांरंगचत्व
रे॥८०॥ ॥जःपंचमः॥ ॥मुनिभेषजमगस्तिरुशीनक्यांचलंघने॥ ऋष
भध्वजशक्रेसोमेशंकरेचार्हदंतरे॥८१॥ ॥७॥इतिजांतवर्गः॥७॥ ॥
प्रोद्वितीयः॥ ॥संसाध्वविशेषेस्यात्संस्तुजलवर्षणे॥ ॥इतिसांतवर्गः॥ ॥

अएकः॥ ॥तोविरंचेबुधेसोम्येऽप्यस्तुजउमूर्खयोः॥८२॥ ॥ओद्वितीयः॥ ॥
प्रज्ञाबुद्धौपंडितेतुप्राज्ञोवाच्यवदिष्यते॥संज्ञानामनिगाययोंचेतनायांरचि स्त्रियां॥८३॥
अर्थस्यसूचनायांचहलाद्येरपिकथ्यते॥अस्तृतीयः॥ ॥सर्वज्ञःशंकरेबुद्धेहतस्तु
कुक्कुरेपिच॥८४॥श्वेतोगणकेपिस्यात्क्षेत्रज्ञश्छेकआत्मनि॥ ॥इतिभांतवर्गः॥
शोद्वितीयः॥ ॥कटःश्रोणौक्रियाकारेकलिंजेऽतिशयेध्रुवे॥८५॥समयेगजगंडेच
पिष्यत्यांतुकरामता॥खटोऽधकूपकफयोःप्रहारांतररंकयोः॥८६॥नटःपामरभेदेच
वीरेप्रगमेभटिः॥घटःसमाधिभेदेचशिरःकूटकुटेषुच॥८७॥घराघटनगोक्षीभघटना
सुचदृश्यते॥कुरुकोटेघरेगेहेशिलाकूटकपूरुषे॥८८॥स्याक्कटीकुंभदास्योंचसुरायांपि
त्रंगुष्ठके॥पटःप्रियालवृक्षेचसुचैलेचपुरस्कृतौ॥८९॥लटःप्रमादवचनदोषयोरप्युदा
हृतः॥वटःकपर्दन्यग्रोधेशुचिवर्तिकयोर्वटी॥९०॥विटोद्यूतलवणेखिंगेमूषिकेखदिरे
पिच॥स्फुटोऽव्यक्तेप्रफुल्लेचव्यासेचकलितोत्यवत्॥९२॥निर्भिन्नकर्करीसस्येपादस्फो १८
टेस्फुटिर्मता॥कूटंयंत्रेऽनृतेराशौनिश्चलेलोहमुद्गरे॥९२॥मायादिशृंगयोस्तुछेसी

रावयवदंभयोः॥पुरद्वारेचशंसंतिललाटोदेशशुक्रेपिच॥९३॥सटोनिकुंजेकांतारेव्रणसं
मार्जनेपिच॥वाटोवृतौचमार्गेचवाटीतुगृहनिष्कुटे॥९४॥चटुश्चाटौपिचंडेचत्वरतिना
मासनांतरे॥कटुःसुगंधेतीक्ष्णेस्याद्कार्यमत्सरेरसे॥९५॥कटुप्रियंगुकटुकारा जिका
स्वर्थदूषणे॥कटुमोनंपुष्टीस्तीक्ष्णेनीरोगेचतुरेन्यवत्॥९६॥पटुपटोलपत्रेपिछत्रालं
वणयोपटुः॥खेटःकफेग्रामभेदेनिंदितेचसुनेदके॥९७॥अट्टंभक्तेचशुल्केचक्षौमेऽ
स्यर्थेगृहोतरे॥पट्टःपेषणपाषाणेव्रणादीनांचबंधने॥९८॥चतुष्पथेचराजादिशासनां
तरपीठयोः॥पट्टोललाटभूषायांपट्टोलाक्षाप्रसादने॥९९॥कुरंचरोदनेरावेकरंगह
नछल्लयोः॥दृष्टमाशंशितेपूज्यतमेप्रियतमेऽन्यवत्॥१००॥दृष्टंसंस्कारयोगेचयो
गेचक्रतुकर्मणि॥दिष्टंक्षेमशुभाभावहपाणेषुप्रचक्ष्यते॥१॥श्लिष्टमव्यक्तयोश्चित्या
न्यश्लिष्टंम्लानेऽन्यवन्मते॥दिष्टंदैवेचकालेस्यान्दिष्टःसृष्टंचनिर्मिते॥२॥युक्तनि
श्चितयोःप्राज्ञेहृष्टेदृषितन्मतः॥रोमांचितेप्रहसितेजातहर्षेचविस्मिते॥३॥व्युष्टंदि
नेप्रभातेचफलेपर्युषितेपिच॥त्वष्टाशिल्पिनिरेवानांतथावृद्धिकसूर्ययोः॥४॥इ

ष्टः स्यादभिलाषेपिसंग्रहे श्लोकयागयोः॥विष्टिः कर्मकरेभद्रे प्रेषणेवेतनेऽपिच॥५॥
दृष्टिः परिमाणमुद्दोद्दृष्टिर्दृग्दर्शनाक्षिषु॥दिष्टिः स्वर्गेसमद्दोच्चदृष्टिः स्यात्कर्षणेबुधे॥६॥सृष्टिः स्वभावेनिर्माणेपुष्टिर्द्दोच्चपोषणे॥यष्टिर्हरिद्रलताशस्त्रभेदयोर्ध्वजदंडके॥७॥भाग्यौचमधुयष्ट्यांचमुष्टिर्बद्धकरेफले॥भ्रष्टिः स्याद्भर्जनेभृज्यवाटिकायांचभाषि॥८॥गृष्टिरेकप्रसूतागोवराद्कांतयोरपि॥घृष्टिः स्याद्घर्षणेविष्णुक्रांतास्पर्शकिटिघ्वपि॥९॥जराजग्नकचेमूलेघृक्षिमांसिकयोर्जरि॥सदाजदाकेसरयोः फणार्हभयोः॥१०॥चोटा स्याद्दूदरेपूगेघटीखंडेचवाससः॥परीक्षार्थंतुलायांचघटः सूत्रिभिरिष्यते॥११॥पटीपटविशेषेस्याद्दखुलोकुंभिकाद्रुमे॥स्यात्कोटिरग्रेशाणाग्रेसख्याभेदप्रकर्षयोः॥१२॥स्यात्तुष्टिः संशयेलेशेसूक्ष्मेलाकालमानयोः॥त्रोटिःस्याद्कलेचेत्यांखगमीनविशेषयोः॥१३॥खाटिः किणेशबरथेरवाटिरेकप्रहेमता॥नटिर्दृब्लासिन्यांशोणनर्तकयोर्नटः॥१४॥ ॥टस्तृतीयः॥ ॥अवटः स्यात्खिले १९
गर्तेकूपेकुहकजीविनि॥विकटः स्कंदरेप्रोक्तोविशालविकरालयोः॥१५॥करटोगजगंडेस्याल्कुसुंभेनिंद्यजीवने॥एकादशाश्रादेपिचवायसे॥१६॥करटोवाद्यभेदेपिनिर्द्दोनिरयेस्मृतः॥परापवादसंरंभेनिर्द्दलेनिःप्रयोजने॥१७॥विपिटः खाद्यभेदेथपिचितेविस्मृतेऽन्यवत्॥कुटजोमलयेख्यातोवातीकेकुसुमेशुनि॥१८॥निकुरस्तुगृहोद्यानेकेहारेकपारयोः॥॥कमटः कच्छपेसूयेप्रकटस्तीव्रमुक्तयोः॥१९॥चपटः स्फारविपुलेचपेरेचपैरोपिच॥पर्पटः पिटविद्वत्तौपर्पटोभेषजांतरे॥२०॥पिच्चटोनेत्ररोगेपिपिच्चटःसीसकेत्रपौ॥व्यंगदंशिक्यभेदेपिधौतोजन्यामपिस्मृते॥२१॥कट्टटः करहारेस्यान्नेकपेकरयोरपि॥हपीटमुद्गरेमीरेकार्यवेजतुकार्यिणोः॥२२॥कुकुटस्तामसेचूडेस्यात्कुकुटोऽग्निकणेपिच॥निषादस्यूद्रयोः पुत्रेतालभेदेतुकुक्कुटौ॥२३॥रसोनस्यप्रभेदेस्याद्गुच्छटीरंभवर्ययोः॥केशटः श्लोकणेविल्वावगटोनगलेऽर्गले॥२४॥कर्कटः करणेस्त्रीणांराशिभेदेकुलीरयोः॥शाल्मलीफलबालुक्योः कर्कटीकर्कटः खगे॥२५॥काकटस्तुरगेनिस्वेसिनंपत्रे॥मोचाटः लक्षजीरेपिरंभास्थिमलयोर्द्रवे॥२६॥वक्कोटोविषवैद्येपिधूर्तेपिनारपि॥वणिटोगायनेचित्रकाकारेस्त्रीकृतजीवने॥२७॥भावाटोभावकेसाधुनिर्देशेकां

सुपिच्या।रोलाटोशैवले सिंहे शुक्लेकाचकिरातयोः॥२८॥द्रोहाटःकथितोगाथाभ्रमरे मृगलुब्धके॥वेहालश्चतिकेपिस्यान्नारटश्चानकाश्वयोः॥२९॥मोरटःकुभवेद्दिक्षुमूलो कोठप्रसूनयोः॥सल्लरात्रात्परक्षीरेमूर्विकायांतुमोरटा॥३०॥वेकटःस्याद्वैकटिकेतथा संजातयौवनेगवेरोग्निश्रितेनीचेवेरंकबदरीफले॥३१॥त्रिकुटंसिंधलवणेत्रिकूटश्च स्फवेलके॥भाकूटःकथ्यतेमीनभेदेशैलांतरेपिच॥३२॥अरिष्टःफेनिलेनिंबेल्गुनेकाककेकयोः॥अरिष्टंसूतिकागारेतक्रेचिकेशुभाशुभे॥३३॥संसरल्लसंगतेविंध्यात्संश्रुद्देवमनाद्दिना॥जघटुःकथितोघाराकूपगर्तेषुसूरिभिः॥परीहिःपरिचर्यायांप्राकामेपिगवेषणे॥वरटाहंसयोषायांगोधोल्यांवरटापिच॥३४॥त्रिपुटोमल्लिकायांचसूक्ष्मैलात्रिचतोरपि॥सतीनकेचनीचेचत्रिपुटःसमुदाहृतः॥३६॥वर्वरश्रीहिभेदेस्यात्रवेडीपण्ययोषिति॥पर्कटीनूतनफलेपूगादेःफलपादपे॥३७॥मर्कटीवानरीस्फूकशढ्योःस्यात्करजांतरे॥मर्कटस्तुणनाभेस्यात्कपोस्त्रीकरणेपिच॥३८॥करंडोदारुपुत्र्यांचकुरंडोसिंहिकांतरे॥चिरंटीतुसुवासिन्यांस्याद्द्वितीयवयःस्त्रियां॥३९॥ ॥टश्चतुर्थः॥ ॥

श्रुतिकरःप्रांचलोहेप्रायश्चित्तसुजंगयोः॥उच्चिंगटोमीनभेदेतल्लाकोपनपूरुषे॥४०॥ जारजश्चात्मणीपुत्रदासीकासुकयोरपि॥कुटंनटस्तुस्थपतौकैवर्तेमुस्तकेपिच॥४१॥ स्यात्खंजरीटःपल्लिकासिंधरोव्रतधारिणोः॥कुंडकीटस्तुचार्वाकेवचनाग्निसमयोरपि॥४२॥नारकीरोडसंज्ञकीकीटेस्यात्सूचकस्तथाविहंतरि॥कार्यपुटःस्यात्क्षपणेमस्तानर्थकरेषुच॥४३॥कामकूटस्तुवेश्यायाःप्रियविभ्रमयोरपि॥वक्रयाटःक्रियारोहेपर्यंतेचशिरवांतरौ॥४४॥बर्कराटाकटाक्षेस्यान्नरुणाहिस्त्रियांचिषि॥स्त्रीणांपयोधरोत्संगकांतदंतनखेपिच॥४५॥करहाटोऽब्धकंठेस्यात्पुष्पदंतभवेस्त्रियां॥परपुष्टःपरभृतेपरपुष्टापणस्त्रियां॥४६॥प्रतिस्पर्धंमतंयुक्तेद्विरुक्त्याचकथिते॥प्रतिस्पर्धःप्रतिनिधेस्यात्प्रत्याख्याने चवाच्यवत्॥४७॥शीतिविष्टस्तुखलतौशीतेदुश्चर्मणिस्मृतः॥चतुष्षष्टेर्कलेपिचतुःषष्टिःकलास्वपि॥४८॥स्याद्गंडुसुटिःक्षपणेक्षपाणाद्विपुकथ्यते॥ ॥टःपंचमः॥ ॥अथस्याद्दशनोक्तिष्ठोनिःश्वासाधरचुंबयोः॥४९॥ ॥ ॥७॥ ॥इतिटांतवर्गः॥ ॥७॥ ॥ ॥ठोद्वितीयः॥ ठकारः स्वरेऽ

चोभेदेस्यात्तदध्यत्वेदिनोः॥सुनावपिहतौवारिपर्ण्यौस्यात्त्रसनेपिच॥५०॥शठोमध्
स्थपुरुषेशठोधंतूरधूर्तयोः॥शठोऽलसेचमूरर्वेचकुंठःकर्मण्यमूरर्वयोः॥५१॥पाठः
स्यासठनेविद्वद्वर्ण्यौपाठाविपठ्यते॥कंठोगलेसंनिधानेध्वनौमर्मनपार्श्वपे॥५२॥ चंठः ६३
स्यादल्पतोद्धाहेरवर्वेकुंतायुधेपिच॥पृक्तंचरममात्रेस्याद्देहस्यावयवांतरे॥५३॥कोष्ठ
कुसूलेचात्मीयेकुक्षेरंतर्गृहेपिच॥कुष्ठंरोगेसुगंधेचगोष्ठंगोस्थानकेमते॥५४॥
गोष्ठीसभायांसंलापेदुष्टःस्याद्दुर्बलेऽधमे॥श्रेष्ठःश्रेष्ठयोरुत्कृष्टःश्रेष्ठाचंडालिकौषधौ
॥५५॥ज्येष्ठःश्रेष्ठेऽतिवृद्धेचज्येष्ठोमासांतरेपिच॥गरुडोधर्क्षयोर्ज्येष्ठश्रेष्ठोवेश्रव
णवरे॥५६॥काकारारुहरिद्रायांकालमानप्रकर्षयोः॥स्याद्दिशिस्थानमात्रेकाष्ठमा
ख्यातमिंधने॥५७॥निष्ठानिष्पत्तिनाशांतयाज्ञानिर्वहणेषुच॥षष्ठीषणेचपूरिण्यां
कात्यायिन्यामपीष्यते॥५८॥ ॥तृतीयः॥ ॥कमठःकच्छपेभांडभेदेचक
मठंमते॥जरठःकर्कशेपांडौजरंकतिनेन्यवत्॥५९॥नर्मठश्चणुकेपिंगेवेकुठः २१
कुल्लशक्रयोः॥श्रीकंठःखंडपरशौश्रीकंठःकुरुजांगले॥६०॥वरिष्ठःस्याद्गुरुतरेप्र

वरेनिलिंपेपि॥वरिष्ठंमरिचेतान्नेसाधिष्ठेऽतिदृढेर्ययोः॥६१॥अंबष्ठोरेपिवि
प्राद्वेश्यास्त्रीतेजंबष्ठाचांलोण्यांस्यात्सारपूतिकयोरपि॥६२॥कनिष्ठोऽत्येऽनुजेय
तिकनिष्ठादुर्बलांगुलौ॥लघिष्ठोऽत्यल्पकेभेदेप्लवङ्गःकालवालयोः॥६३॥प्रकोष्ठो
विस्तृतकरेभूपपक्षांतरेपिच॥कूर्परादवरेवापिप्रतिष्ठास्थानमात्रके॥६४॥गोरवे
यागनिष्पत्तिचतुरक्षरपद्ययोः॥मकुष्ठोव्रीहिभेदेस्यान्मकुष्ठोमंथरेस्यवत्॥६५॥
॥ ॥अश्वचतुर्थः॥ ॥दंतशठःस्यात्कंबीरेकपिलेकर्मरंगके॥नागरंगेपिचागे
यंस्मृतादंतशठाख्युधेः॥६६॥सूत्रकंठोद्विजेप्रोक्तःखंजरीटकपोतयोः॥हरिकंठः
परभृतेलोहान्वितगलेपिच॥६७॥कालकंठस्तुहात्यूहेकलविंगकेचखंजने॥सिता
पांहरेपीतसारकेनीलकंठवत्॥६८॥कलकंठःकलध्वानेहंसेपापतेपिके॥पूति
काष्ठंतुसरलदेवदारुमहीरुहे॥६९॥कालपृष्ठंभवेत्कर्णेचापेकोदंडमात्रके॥काल
पृष्ठस्तुसारंगविशेषेकंकपक्षिणि॥७०॥ ॥७॥इतिठांतवर्गः॥७॥ ॥
॥ ॥डोद्विगीयः॥ ॥गुडःस्यात्कोलकेहस्तिसन्नाहेक्षुविकारयोः॥गुडस्तुहीगु

त्रिकयोर्गुडो मानांतरालयोः॥ ७१॥ जडो मूर्खे हिमग्रस्तेशूकशं व्योन्नडा मता॥ गंडः प्र
ष्ठगंडेकुब्जेखंडः वेयोतरेभिदि॥ ७२॥ व्याडो हिंस्रपशोसर्प्पेताडस्तानबोषयोः॥ सु
षिमेयतृणादौच नाडीनाडीदलद्रुमे॥ ७३॥ नीडंस्याने कुलायेचसकारपूर्वकोतिके॥
क्रोडः शूकरपार्श्वयोः क्रोडंक्रोडाचवक्षसि॥ ७४॥ चोडोदेशविशेषेस्याच्चोडः प्रावरणां
तरे॥ क्ष्वेडः कर्णमयेध्वानेगरलेकुटिलेपिच॥ ७५॥ लोहितार्कफलेक्ष्वेडं घोषपुष्पे
दुरासदे॥ योधानांसिंहनादेतुक्ष्वेडास्यादूरशल्यके॥ ७६॥ खंडंखगादिकोशेस्या
न्मुष्के वीर्येपिचक्वचित्॥ खंडंस्याच्छकलेचेक्षुविकारमणिदोषयोः॥ ७७॥ गंडः कपो
लेपित्तकेयोगभेदेचवर्गउके॥ गंडः प्रवीणेचिह्नेस्यादश्वभूषणबुद्बुदे॥ ७८॥ चंडोदै
त्योत्तरेतीव्रेचंडोदासेयमस्यच॥ चंडाधनदृशीशंखपुष्पोश्वंडोनिकोपने॥ ७९॥ चंडी
कात्यायनीहिंस्राकोपनस्त्रीषुसंमता॥ षंडेपशादिसंघातेषंडः स्याद्भोपतावपि॥ ८०॥
कुंडंदेवजलाधारेपीठरेऽथकमंडलौ॥ कुंडीकुंडः स्मृतोजारान्नृपतिपत्नीसुतेपिच॥ ८१॥ दंडोयमेमानभेदेलगुडेदमसैन्ययोः॥ व्यूहभेदेप्रकांडेऽध्वेकोणमेधानयोरपि॥

८२॥ अभिमानेग्रहेदंडश्चंडांशोःप्रारिपार्श्विके॥ गोंडः पामरजातौचरुद्रनाभौचवाच्य
वत्॥ ८३॥ पिंडंस्यादेबलेचोलेग्रहांशेजीवनायसोः॥ पिंडोदेहजबापुष्पे निवापेसिक्थके
पिच॥ ८४॥ पिंडीस्यात्तगरेऽलांबुखर्जूरीदलयोरपि॥ पंडः शं—ढियापंडापांडुः कुंती
यतोमितौ॥ ८५॥ मंडंमस्तुनिशांकेचमंडः स्यात्सारपिण्डयोः॥ एरंडेभूषणेस्वाथमंडा
धान्यासुराहृतौ॥ ८६॥ सुंडोदैत्यांतरेराहौमुद्गेसुंठितयोरपि॥ शौंडोमत्तेपिविख्यातःशौं
डीपिष्पलिचव्ययोः॥ ८७॥ कांडोनालेतरुस्कंधेबाणेऽवसरनीरयोः॥ कुत्सितेरहसि
स्तंबेकांडवर्गेप्युदाहृतं॥ ८८॥ भांडंभूषणमात्रेपिभांडंभूलवणिग्धने॥ नदीपात्रेतु
रंगाणांभूषणेभाजनेपिच॥ ८९॥ इडावाचिगविस्पणाविडाचबुधयोषिति॥ क्रीडा
केलिप्रकारेस्यान्नृवेलाध्वज्ञानयोरपि॥ ९०॥ चूडाशिखायांवलभीचूडाबाहुविभू
षणे॥ पीडाकृपाशिरोमालाऽपमर्दसरलद्रुषु॥ ९१॥ नाडीनालेशिरागंडदूर्वयोःस्याद्गुणां
तरे॥ नाडीहृषणकालेस्यान्नृवर्चोयांकुहनस्यच॥ ९२॥ रंडामूषकपर्ण्यांचरंडाविधवयोषि
ति॥ चंडापिप्पलिकायांस्यान्नृचंडोहस्तादिवर्जिते॥ ९३॥ सुंडापिजलहस्तिन्योमदिराकरि

LIBRARY BHAU DAJI

हस्तयोः॥ नलिन्यांवारयोषायांसुंदरस्तुभवन्निभेरे॥९४॥ ॥उत्तरतीयः॥ ॥
गारुडःस्यान्मरकतेविषशस्त्रेपिगारुडं॥द्राविडःस्याज्जनपदेवेधमुख्यकशंखयोः॥
॥९५॥प्रचंडोदुर्वहेश्वेतवरवीरेप्रतापिनि॥पिचंडःसुंदरेविंध्यात्यशोरवयवेपिच॥९६॥
तरंडोवडिसीसूत्रवस्त्रवस्तुनिभेलुके॥वरंडोऽभ्यंतरावेदीसंदोहमुखरोगयोः॥९७॥
पूतंडोगंधकीटेपितथागंधमृगेस्मृतः॥मार्तंडस्तपनेक्रोडेशिखंडोबर्हचूडयोः॥९८॥
प्रकोंडोविटपेशस्तेमूलस्कंधांतरेतरोः॥कोरंडोभूलतायांस्याद्दंशभेदेचकार्मुके॥९९॥
शरंडःशरटेधूर्तेसरंडोभूषणांतरे॥मारंडोऽभुजगानांमार्गेगोमयमंडले॥५००॥का
रंडोमधुकोशासिकारंडवलाटके॥कूष्मांडोगणभेदेपिभूलेककर्कटके पिच॥१॥कू
ष्मांडीत्योषधीगोर्योभैरुंडोभीमदर्शने॥भेरुंडोदेवताभेदेयक्षणीभिदिचेष्यते॥
॥२॥वारुंडःसेकपात्रेस्यान्मलदृक्कर्णयोरपि॥गणिस्कंदराजेवारुंडीद्वारपिठ्यामुदी
रिता॥३॥त्रिपिंडीभूरुहेकालदासेदेत्यांतरेपुनः॥वितंडोवाद्यभेदेस्यात्कुधीशाके २३
शिलाकृये॥४॥वितंडाकेरवीर्यांचनिर्गुंडीसिंदुवारके॥नीलशेफालिकायांचकरहा

टचकुत्रचित्॥५॥ ॥उश्चतुर्थः॥ ॥भवेद्धातरथोवास्यावामयोर्यातशोणि
ते॥पिठिलेस्फोटिकायोचदेवताऽस्तुघोषके॥सैंहिकेयग्रहेचापिदेवताऽहुताश
नि॥चक्रवाकोऽक्षिभेदेस्याच्चक्रवाकंतुमंडले॥७॥जलरंडोजलावर्तेपयोरेणोभुज
गमे॥जलपोगऽस्तुशिशुकेविकलांगेऽतिभीरुके॥८॥ ॥७॥इतिडांतवर्गः॥७॥
॥ ॥ठोद्वितीयः॥ ॥दृढःस्थूलेभृशेशक्तेप्रगाढेपिदृढोमतः॥बाढंदृढेप्रतिज्ञा
यांमूढस्तंद्रिनबालयोः॥९॥मूढंरहसिगुप्तेचसंमूढेपुनरन्यवत्॥व्यूढःसंहतविन्य
स्तपृथुलेषुचभेदवत्॥१०॥षंढोवर्षधरेक्लीबेजोपतोवंध्यपोरुषे॥वीढास्याद्वारके
सूतेसोढामर्षणशस्तयोः॥११॥राढासुस्नेषुशोभायांरूढोदग्धासिलाषयोः॥माढिः
पत्राद्यिभंगेस्यान्माढिर्दैन्यप्रकाशने॥१२॥ ॥ठस्तृतीयः॥ ॥आषाढोन्न
तिनांरंडेमासेमलयपर्वते॥वारूढःशंबलेपिस्याद्दूरोच्चलकपाटयोः॥१३॥पिं
जरेपावकेचाथप्रगूढोजठरेस्मृतः॥वृक्षमूलेविरूढस्तुसंजातेंकुरेन्यवत्॥१४
समूढःपुंजितेभुग्नेसद्योजातेनुपद्युते॥उद्गूढऊढेसूलेस्याद्गूढोनिकृष्टोढयोः॥

॥१५॥विगूढोगर्हितेगुप्तप्रतीढोमन्त्रितेघने॥संरूढोंकुहितेप्रौढेप्रगाढोदृढकृत्त्रयोः॥१६॥अध्यूढाहृतसापत्न्यामध्यूढईश्वरे॥ ॥ढश्चतुर्थः॥ ॥ ॥अध्यारूढंसमारूढेभ्यधिकेचापिनेद्यवत्॥१७॥ ॥७॥इतिढोंतवर्गः॥७॥ ॥ ॥णोद्वितीयः॥ ॥कणोऽतिसूक्ष्मेधान्यांशेहस्वाजीरकयोःकणा॥तक्रस्थमक्षिकायोंचरणःकोणकृणजिष्णु॥१८॥गुणोऽप्रधानेरूपादौमौर्व्यांसूत्रेदृढेकोद्रवे॥शुक्लसत्वादिसंख्यादिविद्यादिहरितादिषु॥१९॥पणोवराटमानेस्यान्मूल्येकर्षापणेग्रहे॥कव्यशाकादिकेद्यूतव्यवहारेभृतौधने॥२०॥गणःसमूहेप्रमथेसंख्यासैन्यप्रभेदयोः॥घ्राणंघ्रातेचनासायांकाणःकाकेकचक्षुषोः॥२१॥बाणःस्यात्केवलेकोऽकांडावयवहेत्वयोः॥बाणाख्येगंधमतार्धारैःशाणोमाषचतुष्टये॥२२॥कषणेकरपात्रेचशाणीप्रावरणांतरे॥त्राणंतुत्रायमाणायांरक्षितेरक्षणेपिच॥२३॥प्राणोहृन्मारुतेबालेकाव्यजी॥
ते अऽनिलेरवले॥वाच्यवत्पूरिंप्राणंप्राणास्तत्सुषुकीर्तिता॥२४॥द्रुणंचापेचरथेद्रुणोऽश्विकभृत्ययोः॥द्रुणीकच्छपिकायांचजलद्रोण्यामुदाहृता॥२५॥द्रोणःक्षुपीपतौक्ष्ल २४

ल्लकाकेस्यादाढकेपिच॥आढकानांचतुःकेचद्रोणीस्याभीरुदंतरे॥२६॥द्रोणीकाष्ठंबुवाहिन्यांगवांघासस्तुजि स्थितौ॥गोणाःशुष्कफलेतत्कमृत्तिकाहिकरंडयोः॥२७॥कोणोवाद्यप्रभेदेस्याल्कोणस्तोलगुडेऽर्कजे॥वीणादिवादनापायेऽप्येकदेशेगृहस्यच॥२८॥श्राणःश्रोनाकनद्योःश्रोणःकोकनदच्छवौ॥लोहितेऽश्वेक्षशानौचभ्रूणःस्त्रीगर्भर्डिंभयोः॥२९॥तीक्ष्णंसामुद्रलवणेविषहीलाहिपुष्पके॥तीक्ष्णःक्षारेचहिंग्वादित्यागिनोर्व्यवहर्तरि॥३०॥कर्णःशुथाज्येक्षुतेसुवर्णालोभ्रकावपि॥कर्णश्चेद्रेचक्षत्रेचवर्णःकाचनयज्ञयोः॥३१॥वर्णोद्विजादौशुक्लादौस्तुतौरूपयशाःस्मरे॥विलेपनेकुथायांचवर्णःस्यात्कुणभेदयोः॥३२॥पर्णंस्यात्किंशुकेपत्रेशीर्णंनत्वविशीर्णयोः॥पूर्णःशङ्खसमग्रेचपूरितेचापिवाच्यवत्॥३३॥चूर्णंःक्षोदक्षारभेदचूर्णानिंबायुक्तिषु॥कीर्णंछन्नेपरिक्षिप्तेहिंसितेकीर्णमिश्रिते॥३४॥जीर्णंपक्वेपुराणेचदीर्णंदारितभीतयोः॥उष्णः स्यादातपेग्रीष्मेदक्षेहस्तेसुकेशवे॥३५॥व्यासेऽकुनेकोकिलेचछेलंमरीचलोहयोः॥हेलातुद्रोपरीनीलीलवङ्गासु

कथ्यते॥३६॥वाच्यवत्तेचकेकृत्तंजिह्मुःशक्रेधनंजये॥जित्वरेचाथजिष्णुस्या
त्कृष्णोऽर्कवसुदैवते॥३७॥गेस्तुनटेगायनेचदस्रौतत्रिदुर्दृने॥दस्रिस्तुत्वाश्वमे
षदस्रिःपारवतिश्चउमोः॥३८॥पार्ष्णिःपाश्चात्यभागेस्यात्सादमूलोन्मदस्त्रियोः॥सेना
दृष्टेश्चकुंभ्यांचत्रस्यालिप्सापिपासयोः॥३९॥कुणीसेषाहिलाम्निंदंतरावतेकेशुनोः॥ स्या
मणिर्गीलेमेहनाग्नेरत्नेवाजागलस्तने॥४०॥अणिराणिवदक्षाग्रकीलेस्यादश्रिसी
मयोः॥कुणिस्तुभकरक्षेपिकुणिःस्याकुकुरेऽन्यवत्॥४१॥न्यूणिःक्रमुकभेदेपि
दुष्टेत्यश्रुतावपि॥श्रेणिःपंक्तौकेशपात्रेश्रेणिःस्याच्चारुसंहतौ॥४२॥वाणीस्या
न्नूश्रुतिभारत्योर्वीणीमूल्येबलाहके॥वेणीकचस्यबंधेस्यान्नदीनांमलकेपिच॥
४३॥देवताऽचनूणीतुनीत्योर्नोणानिषंगके॥घृणाजुगुप्साकरुणयोःकाणिर्गुऽ
करंबयोः॥४४॥श्राणायवाग्वांपक्केतुश्राणंस्यूणायसःस्मृतं॥प्रतिमायांगृहस्तं
भेवीणावल्लकिकच्छपोः॥४५॥वेणुस्तूपांतरेवंशेस्थाणुःकीलेस्थिरेहरे॥रेणुःपर्व २५
टकेस्त्रीस्यान्मेल्येणुस्त्रीहिसूक्ष्मयोः॥४६॥ ॥णस्तृतीयः॥ ॥अरुणोऽश्व

स्करोगेस्यात्संध्यारागेऽर्कसारथौ॥निःशङ्कपिलेकुष्ठेद्रव्येवाच्यवदिव्ये॥४७॥
अरुणानिविषाश्यामांमंजिष्ठात्रिवृतासुच॥करुणस्तुरसेरक्षेहपायांकरुणान
ता॥४८॥वरुणःसंमतोनीरेस्वर्लोकेपरमेष्ठिनि॥तरुणस्यान्नरेयूनिकुब्जयुवो
रुबृकयोः॥४९॥तरुणस्तरुभेदेस्युःप्रीचीपतिसूर्ययोः॥वरुणस्तिलकृशाकेपिप्र
कारेवरुणंस्मृतं॥५०॥चरणेबकचाषोस्यान्मूलेगोत्रेपदेपिच॥चरणंभ्रमणेऽध्वो
च्चरणंरासभेध्वनौ॥५१॥लवणेरसरक्षोस्त्रिभेदेषुलवणस्त्रिषु॥करणंसा
धनक्षेत्रकायकायस्थकर्मसु॥५२॥गीतांगहारसंवेगेक्रियाभेदेंद्रियेषुच॥बा
लवादौचकरणंस्मृतःशूद्राविशोऽसुते॥५३॥जरणंजीर्णजातिर्हिंगुसोवर्चे
लेघपि॥धरणंमानभेदेपिधारणेधरणीभुवि॥५४॥रमणंस्यात्पटोचस्यमूलेपि
रमणःप्रिये॥शरणंचधरक्षित्रोःशरणंरक्षणेगृहे॥५५॥कटूतृणंतृणभेदेस्या
द्वाद्यपर्ण्यंचकटूतृणं॥यंत्रणंस्यान्नियमनेबंधनेरक्षणेपिच॥५६॥प्रघणस्ता
म्रकुंभेस्यादलिंदेलोहमुद्गरे॥दुघणोमुद्गरेपिस्यात्तद्वहिणंचपरश्वधे॥५७॥

श्रवणःक्रमनिम्नोर्व्यांमायतेचचतुष्पथे॥प्रगुणेपिक्षणेपिस्यादीरणेशून्यकुपरे॥५८॥
ग्रहणंतूपलब्धौस्यादादमग्रहणंकरे॥ग्रहोपरागस्वीकारबंदीषुग्रहणंमतं॥५९॥ईक्षणं
दर्शनेदृष्टौप्रेक्षणंमेचनेवधे॥लक्षणंम्निचिह्नेचसौमित्रेचापिलक्षणे॥६०॥लक्ष्मणं
लाञ्छनेनाम्निरामभ्रातरिलक्ष्मणः॥लक्ष्मणौषधिसारस्योःसश्रीकेत्वभिधेयवत्॥६१॥
दक्षिणःसरलावामपरछंदानुवृत्तिषु॥वाच्यवद्दक्षिणापाचीयज्ञदानप्रतिक्रियोः॥६२॥
प्रविणंकोचनेवित्तेद्रविणंचपरागमे॥मसृणःकर्कशेस्निग्धेक्ष्मायांमसृणाभवेत्॥६३॥
उषणंमरिचेख्यातंकणायामूषणाभवेत्॥धिषणस्त्रिदशाचार्ये धिषणाधिषिसंमता
॥६४॥धर्षणंस्यात्सरिभवेरतेसत्यांतुधर्षणी॥भीषणोरुरणेरौद्रेभीषणंसल्लकीरसे
॥६५॥हरणंयौनकङ्क्ष्येतुजेपिहरणंहृतौ॥हिरण्येरेतसिस्वर्णेवराटेपिहिरण्यवत्॥
६६॥हरिणःस्यात्कुरंगेपिहरिणःपांडुरेन्यवत्॥हरिणीहरितायांचचारुस्त्रीवृत्तभेद
योः॥६७॥सुवर्णप्रतिमायांचहर्षणोस्त्रिरुगंतरे॥हर्षणोयोगभेदेचश्राद्धदेवेपिच २६
क्वचित्॥६८॥श्रवणंस्याद्दक्षभेदेश्रवणंश्रुतिकर्णयोः॥श्रावणोमासिपावडेदध्या

त्यांश्रावणामता॥६९॥श्रमणोयतिभेदेपिश्रमणोनग्नजीविनि॥स्कंदशैनासुतेनिका
मांसीषुश्रमणाविदुः॥७०॥कल्याणमक्षयस्वर्णेकल्याणंमंगलेपि॥हृपाणोऽसौहृद्या
णीतुछुरिकायांतुकर्तरी॥७१॥सिंहाणंकाचपात्रेस्यात्श्लोहनासिकयोर्मले॥पुराणं
वाच्यवत्स्त्रीपुराणंपंचलक्षणे॥७२॥प्रमाणंनित्यमर्यादासत्सवादिप्रमातृषु॥एक
नाहे मियतायांहेतुशास्त्रेषुचस्मृतं॥७३॥निर्याणंवारणापांगदेशेमाल्येचनिर्गमे॥
निर्माणंनिर्मितौसारेनिर्माणंचसमंजसे॥७४॥निर्वाणमस्तंगमनेनिष्टतौगजमज्ज
ने॥अपवर्गेकुबेरोभृत्यकारकयोरपि॥७५॥दोवाणंमृष्टपर्णेस्यादूर्वायाश्वरसे
पिच॥वारणंप्रतिषेधेस्याद्वारणश्चमतंगजे॥७६॥कारणंकरणेहेतुबंधयोरपिकार
णं॥कारणायातनायांचलपनःकुत्सितेहनौ॥७७॥कार्मणंमंत्रयंत्रादियोजनेकर्म
कारणे॥मार्गणंप्रार्थनेन्वेषेमार्गणोयाचकेशरे॥७८॥मत्कुणोनिर्विषाणेभेनिस्मश्रु
पुरुषेपिच॥उदंशेनालिकेरेचधर्मणोहिंदुभेदयोः॥७९॥कोंकणोदेशभेदेपिशास्त्र
भेदेपिकोंकणं॥कंकणंशोषरेहस्तसूत्रमंडनयोरपि॥८०॥पूरणःपूरकेपिस्यभेदेपूर

णमुच्यते॥पटारंभकसूत्रेचशाल्मलीपूरणीमता॥८१॥सुखेणःकरमर्दःस्याद्दिशु
सुग्रीववेधयोः॥शषणःपारदेहभघर्षणेपरयोरपि॥८२॥शषणेविषाणंतुक्रोडदं
ष्टदंतयोः॥पशोःशृंगेविषाणीतुमेषशृंग्योप्रकीर्तिता॥८३॥करेणुर्गजहस्तिन्योः
कर्णिकारेपिचक्रचित्॥हरेणुस्तुसतीतेस्याद्रेणुकाकुलयोषितोः॥८४॥सुवर्णेस्व
र्णमात्रेपिस्फुरवर्णेकर्णविन्नयोः॥सुवर्णस्तुसुवर्णातुहलाग्रुमेखानरे॥८५॥सुव
र्णःस्वर्णचूडेस्यान्नागरुडेकृतमालके॥सुवर्णीकमलिन्यांचसुवर्णीनाक्ष्यमानरि॥८६
श्रीपर्णमग्निमंथेऽब्जेश्रीपर्णीशाल्मलीद्वये॥दुर्वर्णेचकुवर्णेस्याद्दालुकेरजतेपि
